ततोऽग्निर्वायुराकाशं ततो भूतादिरुच्यते । ततो महान्प्रधानश्च प्रकृतिः पुरुषस्ततः ॥१६
पुरुषादीश्वरो ज्ञेय ईश्वरेणावृतं जगत् । एवं मेरोः प्रमाणं तु सर्वमेतत्प्रकीर्तितम् ॥१७
चतुरस्रश्चतुः शृंगः स मेरुः काञ्चनः शुभः । पृथिव्यां संस्थितो मध्ये सिद्धगन्धर्वसेवितः ॥१८
चतुर्भिः काञ्चनैः शृंगैर्दिव्यैर्दिवमिवोल्लिखन् । योजनानां सहस्राणि चतुराशीतिरुच्छ्रितः ॥१९
प्रविष्टः षोडशाधस्तादष्टाविंशतिविस्तृतः । विस्तारस्त्रिगुणश्चास्य परिणाहस्ततः स्मृतः ॥२०
तस्य सौमनसं नाम शृंगमेकं तु काञ्चनम् । द्वितीयं पद्मरागाभं ज्योतिष्कं नाम नामतः ॥२१
तृतीयं नामतश्चित्रं सर्वदेवमयं शुभम् । चतुर्थं राजतं शुक्लं चन्द्रौजस्कमिति स्मृतम् ॥२२
यत्तु सौमनसं नाम शृंगं गाङ्गेयमुच्यते । तदेव चोदयो नाम्ना यत्रोद्यन्दृश्यते रविः ॥२३
उत्तरेण परिक्रम्य जम्बूद्वीपं दिवाकरः । दृश्यो भवति भूतानां शिखरं च समास्थितः ॥२४
काञ्चनस्य च शैलस्य तेजसार्कस्य चाहृते । उभे सन्ध्ये प्रकाशेते आताम्रे पूर्वपश्चिमे ॥२५
शृंगे सौमनसे सूर्य उत्तिष्ठत्युत्तरायणे । ज्योतिषे दक्षिणे चापि विषुवे मध्यतस्तयोः ॥२६
ईशेन्द्रोद्रिश्च ऐशान्यां तत्राग्निः पूर्वदक्षिणे । नैर्ऋतेऽपि ततो ज्ञेयो वायव्ये मरुतस्तथा ॥२७
मध्ये तु कंजजः साक्षाद्ग्रहाः ज्योतींषि चैव हि । आदित्यस्तेन रूपेण तस्मिन्व्योम्नि प्रतिष्ठितः ॥२८

---

सातवाँ रसातल लोक है ।१५। वहाँ भी पूर्व की भाँति अग्नि, वायु, आकाश, भूतादि, महान्, प्रधान, प्रकृति, पुरुष तथा ईश्वर की उत्तरोत्तर महत्ता अधिक बतायी गयी है और वह भी जगत् ईश्वर से आवृत है। इस प्रकार मेरु का समस्त प्रमाण बता दिया गया ।१६-१७। चौकोर एवं चार शिखरों से युक्त होने के नाते मेरु पर्वत शुभ एवं काञ्चन मय होकर अवस्थित दिखायी देता है पृथिवी के मध्य भाग में उसकी स्थिति बतायी गई है, जो सर्वदा सिद्ध एवं गन्धर्वों द्वारा सेवित होता रहता है ।१८। वह पर्वत जिसके

**इदं देवमयं व्योम तथा लोकमयं स्मृतम् । पूर्वकोणस्थिते शृंगे स्थितः शुक्रो महीपते ॥२९**
**हेलिजश्चापरे ज्ञेयो धननाथस्तथापरे । सोमश्चापि चतुर्थे तु स्थितः शृंगे जनाधिप ॥३०**
**मध्ये केशास्थितो राजन्हुङ्कारश्च पिनाकिनः । शृंगे पूर्वोत्तरे राजन्स्थितो देवो विधुक्षये[1] ॥३१**
**ततः स्थितो महादेवो गोपतिर्लोकपूजितः । पूर्वाग्नेयीस्थिते शृंगे स्थितो वै शाण्डिलः सुतः ॥३२**
**ततः स्थितो महातेजाः कीनाशो हेलिनन्दनः । स्थितो वै नैऋते शृंगे विरूपाक्षो महाबलः ॥३३**
**तस्मादनन्तरो देवः स्थितो वै यादसां पतिः । ततः स्थितो महातेजा वीर मित्रो महाबलः ॥३४**
**वायव्यं शृंगमाश्रित्य सर्वदेवनमस्कृतम् । ततः स्थितो दशबलो नरमारुह्य भारत ॥३५**
**ब्रह्मा मध्ये स्थितो देवो ह्यनन्तश्चाध एव हि । उपेन्द्रशङ्करौ देवौ ब्रह्मणोऽन्ते समास्थितौ ॥३६**
**एष मेरुस्तथा व्योम एष धर्मश्च पठ्यते । सर्वदेवमयश्चायं मेरुर्व्योम इति स्मृतः ॥३७**
**तथा वेदमयश्चापि पठ्यते नात्र संशयः । शृंगाणि वेदाश्चत्वारः पूर्वशृंगादयो विदुः ॥३८**

**इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे व्योममाहात्म्यवर्णनं नाम षड्विंशत्यधिकशततमोऽध्यायः ।१२६।**

---

है ।२७-२८। यह व्योम इस प्रकार देवमय एवं लोकमय बताया गया है । हे महीपते ! पूरब कोण वाले शिखर पर स्थित शुक्र सुशोभित हैं ।२९। उसी प्रकार दूसरे पर हेलिज तीसरे पर धननाथ (कुबेर) और चौथे शिखर पर सोम (चन्द्र) स्थित हैं ।३०। हे राजन् ! उसके मध्य भाग में ब्रह्मा, विष्णु एवं पिनाकी की हुंकार (शिव) स्थित हैं । उस पर्वत के पूर्वोत्तर वाले शिखर पर देव विधुक्षय, महादेव, एवं लोक पूजनीय गोपति स्थित हैं । और पूर्व-दक्षिण (आग्नेय) वाले शिखर पर शांडिल सुत की

# अथ सप्तविंशत्यधिकशततमोऽध्यायः

## सूर्यप्रसादवर्णनम्

### शतानीक उवाच

कथमाराधितः सूर्यः साम्बेनामिततेजसा । विमुक्तस्तु कथं रोगैर्ब्रूहि मां द्विजसत्तम ॥१

### सुमन्तुरुवाच

साधु पृष्टोऽस्मि राजेन्द्र शृणु साम्बकथां पुरा । विस्ताराद्वच्मि ते सर्वां कथां पापविमोचिनीम् ॥२
पुरा संश्रुत्य माहात्म्यं भास्करस्य स नारदात् । विनयादुपसङ्गम्य वचः पितरमब्रवीत् ॥३
कश्मलेनाभिभूतोऽस्मि मलेन व्याधिनाच्युत । वैद्यैरोषधिभिश्चापि न शान्तिर्मम विद्यते ॥४
वनं गच्छामि भगवन्ननुज्ञां दातुमर्हसि । शिवेन पुण्डरीकाक्ष ध्याय मां पुरुषोत्तम ॥५
अनुज्ञातः स कृष्णेन सिन्धोरुत्तरकूलतः । गत्वा सन्तारयामास चन्द्रभागां महानदीम् ॥६
ततो मित्रवनं गत्वा तीर्थं त्रैलोक्यविश्रुतम् । उपवासपरः साम्बः शुष्को धमनिसन्ततः ॥७
आराधनार्थं सूर्यस्य गुह्यं स्तोत्रं[1] जजाप ह । वेदैश्चतुर्भिः समितं पुराणाश्रयबृंहितम् ॥८
यदेतन्मण्डलं शुक्लं दिव्यं ह्यजरमव्ययम् । युक्तं मनोजवैरश्वैर्हारीतैर्ब्रह्मवादिभिः[2] ॥९

---

# अध्याय १२७

## सूर्यप्रसाद का वर्णन

आदिरेष[1] हि भूतानामादित्य इति संज्ञितः । त्रैलोक्यचक्षुरेवात्र परमात्मा प्रजापतिः ॥१०
एष वै मण्डले ह्यस्मिन्पुरुषो दीप्यते महान् । एष विष्णुरचिन्त्यात्मा ब्रह्मा चैष पितामहः ॥११
रुद्रा महेन्द्रो वरुण आकाशं पृथिवी जलम् । वायुः शशाङ्कः पर्जन्यो धनाध्यक्षो विभावसुः ॥१२
यष एष मण्डले ह्यस्मिन् पुरुषो दीप्यते महान् । एकः साक्षान्महादेवो वृत्रमण्डनिभः सदा ॥१३
कालो ह्येष महाबाहुर्निबोधोत्पत्तिलक्षणः । य एष मण्डले ह्यस्मिंस्तेजोभिः पूरयन्महीम् ॥१४
भ्राम्यते ह्यव्यवच्छिन्नो वातैर्योऽमृतलक्षणः । नातः परतरं किञ्चित्तेजसा विद्यते क्वचित् ॥१५
पुष्णाति सर्वभूतानि एष एव सुधामृतैः । अन्तस्थान्म्लेच्छजातीयांस्तिर्यग्योनिगतानपि ॥१६
कारुण्यात्सर्वभूतानि पासि त्वं च विभावसो । श्वित्रकुष्टचंधबधिरान्पंगूंश्चापि तथा विभो ॥१७
प्रपन्नवत्सलो देव कुरुते नीरुजो भवान् । चक्रमण्डलमग्नांश्च निर्धनाल्पायुषस्तथा ॥१८
प्रत्यक्षदर्शी त्वं देव समुद्धरसि लीलया । का मे शक्तिः स्तवैः स्तोतुमार्तोऽहं रोगपीडितः ॥१९
स्तूयसे त्वं सदा देवैर्ब्रह्मविष्णुशिवादिभिः । महेन्द्रसिद्धगन्धर्वैरप्सरोभिः सगुह्यकैः ॥२०
स्तुतिभिः किं पवित्रैर्वा तव देव समीरितैः । यस्य ते ऋग्यजुः साम्नां त्रितयं मण्डलस्थितम् ॥२१

---

और हारीत (पक्षी) एवं ब्रह्मवादी ब्राह्मणों से सुसेवित हो रहा है, वही प्राणियों में सर्वप्रथम आदि है अतः आदित्य नाम से स्मरण किया जाता है। और यही तीनों लोकों का नेत्र परमात्मा तथा प्रजापति है।९-१०। इस प्रकार इस मंडल में देदीप्यपान यह महान् पुरुष जो दिखाई देता है, वही अचिंतनीय विष्णु, पितामह ब्रह्मा, रुद्र, महेन्द्र, वरुण, आकाश, पृथ्वी, जल, वायु, चन्द्रमा, पर्जन्य (मेघ), कुबेर, एवं विभावसु है।११-१२। इस मण्डल में जो एक प्रदीप्त तथा महान् पुरुष दिखाई दे रहा है, वह साक्षात् महादेव ही है और वह सदैव अण्डे की भाँति ही घिरा रहता है।१३। इस प्रकार इसी [illegible]

ध्यानिनां त्वं परं ध्यानं मोक्षद्वारं च मोक्षिणाम्। अनन्ततेजसाक्षोभ्यो ह्यचिंत्याव्यक्तनिष्कलः ।।२२
यदयं व्याहृतः किञ्चित्स्तोत्रेऽस्मिञ्जगतः पतिः। आर्तिं भक्तिं च विज्ञाय तत्सर्वं ज्ञातुमर्हसि ।।२३
तमुवाच ततः सूर्यः प्रीत्या जाम्बवतीसुतम्। प्रीतोऽस्मि तपसा वत्से ब्रूहि तन्मां यदिच्छसि ।।२४

## साम्ब उवाच

यदि प्रसन्नो भगवानेष एव वरो मम। भक्तिर्भवतु मेऽत्यर्थं त्वयि देव सनातन ।।२५

## श्रीसूर्य उवाच

भूयस्तुष्टोऽस्मि भद्रं ते वरं वरय सुव्रत। स द्वितीयं वरं वव्रे तदैव वरदं विभुम् ।।२६
मलः शरीरसंस्थो मे त्वत्प्रसादात्प्रणश्यतु। येन मे शुद्धमखिलं वपुर्भवतु गोपते ।।२७

## सुमन्तुरुवाच

स तथास्त्विवति तेनोक्तो भास्करेण महात्मना। तां मुमोच रुजं साम्बो देहात्त्वचमिवोरगः ।।२८
ततो रूपेण दिव्येन रूपवानभवत्पुनः। प्रणम्य शिरसा देवं पुरतोऽवस्थितोऽभवत् ।।२९

## श्रीसूर्य उवाच

भूयश्च शृणु मे साम्बं तुष्टोऽहं यद्ब्रवीमि ते। अद्य प्रभृति त्वन्नाम्ना मम स्थानानि सुव्रत ।।
क्षितौ ये स्थापयिष्यन्ति तेषां लोकाः सनातनाः ।।३०

---

मंडल में ही अवस्थित हैं ।२०-२१। हे देव ! तुम ध्यान करने वालों के लिए उत्तम ध्यान, मोक्षार्थियों के लिए मोक्ष द्वार, अनन्ततेज होने के नाते अक्षोभ्य, अचिंत्य, अव्यक्त, एवं निष्फल हो ।२२। आप जगत् के

स्थापयस्वैव मामस्मिंश्चन्द्रभागातटे शुभे । तव नाम्ना च साम्बेदं परां ख्यातिं गमिष्यति ॥३१
कीर्तिस्तवाक्षया लोके ख्यातिं यास्यति सुव्रत । भूयश्च ते प्रदास्यामि प्रत्यहं स्वप्नदर्शनम् ॥३२

### सुमन्तुरुवाच

एवं दत्त्वा वरं तस्मै वृष्णिसिंहाय चापरम् । प्रत्यक्षदर्शनं दत्त्वा तत्रैवान्तरधाद्धरिः ॥३३
य इदं पठते स्तोत्रं त्रिकालं भक्तिमान्नरः । त्रिसप्तशतमावर्त्य होमं वा सप्तरात्रकम् ॥३४
राज्यकामो लभेद्राज्यं धनकामो लभेद्धनम् । रोगार्तो मुच्यते रोगाद्यथा साम्बस्तथैव सः ॥३५
सूर्यलोकं व्रजेच्चापि भक्त्या पूज्य दिवाकरम् । रमते च तथा तस्मिन्देवैश्च परिवारितः ॥३६

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने सूर्यप्रसादवर्णनं नाम सप्तविंशत्यधिकशततमोऽध्यायः ।१२७।

# अथाष्टाविंशत्यधिकशततमोऽध्यायः

## साम्बस्तववर्णनम्

### सुमन्तुरुवाच

अस्तावीच्च ततः साम्बः कृशो धमनिसन्ततः । राजन्नामसहस्रेण सहस्रांशुं दिवाकरम् ॥१
खिद्यमानं ततो दृष्ट्वा सूर्यः कृष्णात्मजं तदा । स्वप्नेऽस्मै दर्शनं दत्त्वा पुनर्वचनमब्रवीत् ॥२

---

करेंगे, उनके लिए लोक अचल रहेंगें ।३०। अतः हे साम्ब चन्द्रभागा नदी के उस शुभ तट पर मुझे स्थापित करो । तुम्हारे नाम से उसे विशेष ख्याति प्राप्त होगी ।३१। हे सुव्रत ! लोक में तुम्हारी अक्षय कीर्ति विशेष ख्याति प्राप्त करूँगी और फिर भी प्रतिदिन मैं तुम्हें स्वप्न में दर्शन दिया करूँगा ।३२

## श्रीसूर्य उवाच

साम्ब साम्ब महाबाहो शृणु जाम्बवतीसुत । अलं नामसहस्रेण पठ चेमं शुभं स्तवम् ।।३
यानि गुह्यानि नामानि पवित्राणि शुभानि च । तानि ते कीर्तयिष्यामि प्रयत्नादवधारय ।।४
वैकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः । लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ।।५
लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा । तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ।।६
गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः । एकविंशतिरित्येष स्तव इष्टस्सदा मम ।।७
शरीरारोग्यदश्चैव धनवृद्धियशस्करः । स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः ।।८
य एतेन महाबाहो द्वे सन्ध्येऽस्तमनोदये । स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते ।।९
मानसं वाचिकं वापि कायिकं यच्च दुष्कृतम् । एकजाप्येन तत्सर्वं प्रणश्यति ममाग्रतः ।।१०
एष जप्यश्च होमश्च सन्ध्योपासनमेव च । बलिमन्त्रोऽर्घ्यमन्त्रोऽथ धूपमन्त्रस्तथैव च ।।११
अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे । पूजितोऽयं महामन्त्रः सर्वपापहरः शुभः ।।१२
एवमुक्त्वा स भगवान्भास्करो जगतां पतिः । आमन्त्र्य कृष्णतनयं तत्रैवान्तर्हितोऽभवत् ।।१३
साम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् । प्रीतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ।।१४

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बस्तववर्णनं
नामाष्टाविंशत्यधिकशततमोऽध्यायः ।१२८।

---

**श्रीसूर्य बोले**—साम्ब, साम्ब ! महाबाहो, हे जाम्बवती सुत ! मेरी बात सुनो ! तुम सहस्र नाम का पाठ बन्द करके इस शुभ स्तोत्र का पाठ करो ।३। एवं मेरे गुप्त, पवित्र, एवं शुभ, जितने नाम हैं मैं

# अथैकोनत्रिंशदधिकशततमोऽध्यायः

## साम्बकृतादित्यमूर्तिस्थापनवर्णनम्

### सुमन्तुरुवाच

अथ लब्धवरः साम्बो वरं प्राप्य पुरातनम् । मन्यमानस्तदाश्चर्यं प्रहृष्टेनान्तरात्मना ॥१
पूर्वाभ्यासेन तेनैव सार्धमन्यैस्तपस्विभिः । स्नापनार्थं नातिदूरं चन्द्रभागां नदीं ययौ ॥२
कृत्वात्ममण्डलाकारं श्रद्दधानो दिनेदिने । सस्नौ सञ्चिन्तयामास किं रूपं स्थापयाम्यहम् ॥३
स स्नातः सहसैवाथ प्रणम्य[1] तु प्रभावतीम् । उह्यमानां जलौघेन प्रतिमां सम्मुखीं रवेः ॥४
तां दृष्ट्वा तस्य वीरस्य समुत्पन्नमिदं यथा । देवेन यत्तदाज्ञप्तं तदिदं नात्र संशयः ॥५
स तामुत्तार्य सलिलादानीय च महीपते । तस्मिन्मित्रवनोद्देशे स्थापयामास तां तदा ॥६
निधाय प्रतिमाँल्लोके साम्बस्तस्य महात्मनः । मित्रं मित्रवने रम्ये स्थापयित्वा विधानतः ॥७
ततस्तामेव पप्रच्छ प्रणम्य प्रतिमां रवेः । केनेयं निर्मिता नाथ भवतो ह्याकृतिः शुभा ॥८
प्रतिमा तमुवाचाथ शृणु साम्ब ब्रुवे स्वयम् । निर्मिता येन चाप्येषा मदीया पुरुषाकृतिः ॥९
ममातितेजसाविष्टं रूपमासीत्पुरातनम् । असह्यं सर्वभूतानां ततोऽस्म्यभ्यर्चितः सुरैः ॥

---

# अध्याय १२९

## साम्बकृतादित्यमूर्तिस्थापन का वर्णन

सह्यं भवतु ते रूपं सर्वप्राणभृतामिति ॥१०
ततो मया समादिष्टो विश्वकर्मा महातपाः । तेजसां शातनं कुर्वन्रूपं निर्वर्तयस्व मे ॥११
ततस्तु मत्समादेशात्ते नैव निपुणं तदा । शाकद्वीपे भ्रमिं कृत्वा रूपं निर्वर्तितं मम ॥१२
प्रीत्या तेषां प्रपञ्चोऽयं स मया कारितः पुनः । तेनेयं कल्पवृक्षात्तु निर्मिता विश्वकर्मणा ॥१३
कृत्वा हिमवतः पृष्ठे पुरा सिद्धनिषेविते । त्वदर्थं चन्द्रभागायां ततस्तेनावतारिता ॥१४
भवतस्तारणार्थं हि ततः स्थानमिदं शुभम् । रुचिरं सर्वदा साम्ब सान्निध्यं मेऽत्र यास्यति ॥१५
सान्निध्यं मम पूर्वाह्णे सुतीरे द्रक्ष्यते जनैः । कालप्रिये च मध्याह्नेऽपराह्णे चात्र नित्यशः ॥१६
पूर्वाह्णे पूजयेद् ब्रह्मा मध्याह्ने चक्रधृत्स्वयम् । शङ्करश्चापराह्णे तु मां पूजयति सर्वदा ॥१७
इत्युक्तोऽसौ भगवता भास्करेण स यादवः । हर्षमाप महाबाहो भास्करोऽन्तर्दधे ततः ॥१८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने
साम्बकृतादित्यमूर्तिस्थापनं नामैकोनत्रिंशदधिकशततमोऽध्यायः ॥१२९।

---

होने के कारण देवताओं ने मेरी आराधना की कि हे देव ! आप का तेज सभी प्राणियों के सहन करने के योग्य जिस भाँति हो सके वैसा ही करने की कृपा करें ।१०। पश्चात् मैंने महातपस्वी विश्वकर्मा को आज्ञा दिया कि मेरे तेज को काट छाँटकर मेरा (सौन्दर्यपूर्ण) रूप बनाओ ।११। इसके उपरांत मेरे आदेश देने पर उस निपुण विश्वकर्मा ने शाकद्वीप में खराद पर चढ़ा कर मेरे रूप को सौन्दर्य पूर्ण बनाया ।१२। पुनः उन लोगों के प्रसन्नार्थ मैंने इस मूर्ति को भी बनवाया था । विश्वकर्मा ने कल्पवृक्ष के काष्ठ से ही इस मेरी

# अथ त्रिंशदधिकशततमोऽध्यायः

## प्रसादलक्षणवर्णनम्

### शतानीक उवाच

कथं साम्बेन विप्रेन्द्र प्रतिष्ठा कारिता रवेः। कस्य वा वचनात्तेन प्रासादः कारितो रवेः ॥१

### सुमन्तुरुवाच

अत्र ते वच्मि राजेन्द्र यथा साम्बेन धीमता। प्रतिष्ठा कारिता भानोः प्रसादश्च महीपते ॥२
सुलब्ध्वा प्रतिमां भानोश्चिन्तयामास नारदम्। स चापि चिन्तितश्चागाद्यत्र जाम्बवतीसुतः ॥३
तमागतमभिप्रेक्ष्य नारदं मुनिसत्तमम्। सम्पूज्य विधिवत्सांबो नारदं वाक्यमब्रवीत् ॥४
प्रासादं कारयेद्यस्तु भास्करस्य नरो द्विज। किं फलं तस्य देवर्षे प्रतिष्ठां यश्च कारयेत् ॥५

### नारद उवाच

प्रासादं शोभने देशे यस्तु कारयते रवेः। स याति नरशार्दूल सूर्यलोकं न संशयः ॥६

### साम्ब उवाच

कथं कुर्यादायतनं कस्मिन्देशे द्विजोत्तम। कीदृक्छस्तं चायतनं देवदेवस्य[1] वै द्विज ॥७

---

# अध्याय १३०

## प्रसादलक्षण का वर्णन

## नारद उवाच

यत्र प्रभूतं सलिलमागमे च विनाशने । देवतायतनं कुर्याद्यशोधर्मविवृद्धये ॥८
इष्टापूर्तेन लभते लोकांस्तांश्च[1] विभूषितान् । देवानामालयं कार्यं द्वयं यत्र च दृश्यते ॥९
सलिलाद्यं च आरामः कृतेष्वायतनेषु च । स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः ॥१०
सरःसु नलिनीच्छन्ननिरस्तरविरश्मिषु । हंससंक्षिप्तकह्लारवीथीविमलवारिषु ॥११
हंसकारण्डवक्रौञ्चचक्रवाकविराविषु । पर्यन्तविमलच्छायाविश्रान्तजनचारिषु ॥१२
क्रौञ्चकाञ्चीसुलापाश्च कलहंसकलस्वनाः । नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः ॥१३
फुल्लद्रुमोत्तमावासाः सङ्गमश्रोणिमण्डलाः । पुलिनाद्युन्नतोरस्का रसहासाश्च निम्नगाः ॥१४
वनोपान्तनदीशैलसंस्करोपान्तभूमिषु । रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च ॥१५
भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्मणि । ता एवं तेषां शस्यन्ते देवतायतनेष्वपि ॥१६
चतुःषष्टिपदं कुर्याद्देवतायतनं सदा । द्वारं च मध्यमं तस्मिन्समदिक्सम्प्रशस्यते ।१७
यो विस्तारो भवेत्तस्य द्विगुणा तत्समुन्नतिः । उच्छ्रायस्तु तृतीयोऽथ तेन तुल्या कटिर्भवेत् ॥१८

---

**नारद बोले**—वर्षा ऋतु के आगमन काल में एवं उसके निकल जाने के पश्चात् भी जहाँ अत्यन्त जल भरा रहता हो, उस जलाशय के तट पर अपने यश एवं धर्म की वृद्धि की कामनावश देव मन्दिर का निर्माण कराना चाहिए ।८। क्योंकि यज्ञ एवं जलाशय के निर्माण कराने से सौन्दर्य पूर्ण लोकों की प्राप्ति होती है । इसलिए देव मन्दिर का निर्माण ऐसे प्रदेश में होना चाहिए जो सुन्दर जलाशय एवं मनोहर बगीचे से सुशोभित हो ।९। क्योंकि देव मन्दिर के समीप जलाशय एवं बगीचे के लगवाने से उन्हीं स्थानों में देवता लोग निवास करते हैं ।१०। जिस जलाशय में कमलिनी से आच्छन्न होने के नाते सूर्य की किरणें जल तक

विस्ताराधों भवेद्गर्भो भित्तियोन्याः समन्ततः । गर्भपादोनविस्तीर्णं द्वारं द्विगुणमुच्छ्रितम् ॥१९
उच्छ्रयात्पादविस्तीर्णा शाखा तद्वदुदुम्बरी । विस्तारात्पादप्रतिमाद्बाहुल्यं शेषयोः स्मृतम् ॥२०
नृपं सप्तनवभिः शाखाभिस्तत्प्रशस्यते । अथ शाखाचतुर्भागे प्रतिहारौ निवेशयेत् ॥२१
शैलमङ्गल्यविहगः श्रीवृक्षः स्वस्तिकैर्घटैः । मानाष्टमेन[1] भागेन प्रतिमा स्यात्सपिण्डिका ॥२२
द्विभागा प्रतिमा तत्र तृतीयो भागपिण्डिका । पूर्वे मेरुर्महाबाहो कैलासश्च तथापरे ॥२३
भवन्ति चापरे वीर विमानच्छदनं तथा । समुद्रपद्मगरुडनन्दिवर्द्धनकुञ्जराः ॥२४
गृहराजो वृषो हंसः सर्वतोभद्रको घटः । सिंहो वृषश्चतुष्कोणः षोडशाष्टाश्रयस्तथा ॥२५
इत्येते विंशतिः प्रोक्ताः प्रासादा यदुनन्दन । यथोक्तानुक्रमेणैव लक्षणानि वदामि[2] ते ॥२६
नवत्रिंशदुच्छ्रितमेरुर्द्वादशभौमो विविधकुहरश्च । द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णः ॥२७
त्रिंशद्धस्तायामो दशभौमः सप्त मन्दरः । शिखरयुतः कैलासोऽपि शिखरवानष्टाविंशोष्टभौमश्च ॥२८
जालगवाक्षैर्युक्तो विमानसंज्ञस्त्रिसप्तकायामः । नन्दन इति वै भौमो द्वात्रिंशत्षोडशाङ्गयुतः ॥२९
वृत्तः समुद्गनामा पद्माकृतिरयं चाष्टौ । शृङ्गेणैकेन भवेदेकेन च भूमिका तस्य ॥३०

---

विस्तार के पहले अर्ध भाग में मन्दिर का गर्भ एवं दूसरे में चारों ओर की दीवाल होनी चाहिए । और गर्भ के चौथाई भाग के समान चौड़ा तथा उससे दुगुना ऊँचा दरवाजा बनाना चाहिए ।१९। उसी भाँति विस्तार के चौथाई भाग के समान उदुम्बरी गूलर आदि वृक्षों की शाखा बनाये जो ऊँचाई के चौथाई भाग के समान चौड़ी हो ।२०। मनुष्य के लिए पाँच, सात, एवं नव शाखा वाला दरवाजा प्रशस्त बताया गया है । पुनः शाखा के चौथाई भाग में दो द्वारपालों की मूर्ति स्थापित करके शेष द्वार शाखा के स्थान में शैल (पर्वत) मांगलिक पक्षी श्रीवृक्ष, एवं मांगलिक कलशों की रचना करनी चाहिए । शाखा के आँठवें भाग के समान ऊँची चौकी समेत प्रतिमा ...

गरुडाकृतिश्च गरुडो नन्दी वै षष्टिविस्तीर्णः । कायश्च सप्तभौमो विभूषितोंऽगैश्च सप्तविंशतिभिः ॥३१
कुञ्जर इति गजपृष्ठः षोडशहस्तोच्छ्रितो मध्ये । गृहराजः षोडशकस्त्रिचक्रशाला भवेद्वलभी ॥३२
वृष एवं भूमिशृङ्गो द्वादशहस्तः समुन्नतो वृत्तः । हंसो हंसाकारो घटोऽष्टसहस्रकलशरूपः ॥३३
द्वारैर्युतश्चतुर्भिर्बहुशिखरो भवति सर्वतोभद्रः । बहुरुचिरचन्द्रशालः षड्विंशद्भागभूमिश्च ॥३४
सिंहः सिंहाकारो[1] द्वादशकोणोऽष्टहस्तश्च ॥३५
सहस्रत्रितयं चैव कथितं विश्वकर्मणा । प्राहुः स्थापयतश्चात्र मतमेकं विपश्चितः ॥३६
कपोतपालिनीयुक्तमतो गच्छति तुल्यताम् ॥३७

## साम्ब उवाच

य एते कथिता विप्र प्रासादा विंशतिस्त्वया । तेषां सूर्यस्य कः कार्यः प्रासादो भास्करस्य तु ॥३८
स्थानानि यानि चोक्तानि प्रासादस्य द्विजोत्तम । तेषां त्वयोक्तं हि पुरं व्ययवर्द्धिर्नरैर्युतम् ॥३९
तस्मिन्प्रदेशे वै कार्यं भानोर्मन्दिरमुत्तमम् । दिशां भागे च कतमे ब्रूहि शेषं द्विजोत्तम ॥४०

---

एक ही भूमि (मंजिला) होती है ।३०। गरूड़ के समान गरुड़ नामक भवन होता है । साठ हाथ का विस्तृत नन्दिवर्द्धन नामक भवन होता है जिसमें सात कोठे होते हैं वह सत्ताइस अंगों से सुशोभित होता है ।३१। सोलह हाथ ऊँचा, मध्यमभाग में हाथी की पीठ के समान आकार वाला कुंजर नामक भवन बनाया जाता है । सोलह हाथ का विस्तृत तीन चन्द्रशालाओं से युक्त गृहराज नामक भवन होता है ।३२। बारह हाथ का विस्तृत एक भूमि (मंजिला) एक शिखर एवं गोलाकार वृष नामक भवन होता

## नारद उवाच

पुरमध्यं समाश्रित्य कुर्यादायतनं रवेः । दिशां भागेऽथ वा पूर्वे पूर्वद्वारसमीपतः ॥४१
भूमिं परीक्ष्य पूर्वं तु कुर्यादायतनं ततः[1] । इष्टगन्धरसोपेता निम्ना[2] भूमिः प्रशस्यते ।४२
शर्करातुषकेशास्थिक्षाराङ्गारविवर्जिता । मेघदुन्दुभिनिर्घोषा सर्वबीजप्ररोहिणी ॥४३
शुक्ला रक्ता तथा पीता कृष्णा च कथिता क्षितिः । द्विजराजन्यवैश्यानां शूद्राणां च यथाक्रमम् ॥४४
परीक्षितायां तस्यां तु मध्ये तस्याः प्रमाणतः । उपलिप्य चतुर्हस्तं चतुरस्रं[3] समन्ततः ॥४५
हस्तमात्रमधः कृत्वा मध्ये तस्या दशाङ्गुलम् । गर्तमुत्कीर्य तेनैव पांसुना प्रतिपूरयेत्[4] ॥४६
समे समगुणा ज्ञेया हीने हीनगुणा भवेत् । वर्धमाने तु वै पांसौ भवेद्वृद्धिकरी क्षितिः ॥४७
नित्यं सम्मुखमर्कस्य कदाचित्पश्चिमामुखम् । स्थापनीयं गृहं सम्यक्प्राङ्मुखस्थानकल्पनात् ॥४८
भवनाद्दक्षिणे पार्श्वे रवेः स्नानगृहं भवेत् । अग्निहोत्र गृहं कार्यं रवेरुत्तरतः शुभम्[5] ॥
उदङ्मुखं भवेच्छम्भोर्मातृणां गृहमेव च ॥४९
ब्रह्मा पश्चिमतः स्थाप्यो विष्णुरुत्तरतस्तथा । निम्बस्तु[6] दक्षिणे पार्श्वे वामे राज्ञी प्रकीर्तिता ॥५०
पिंगलो पक्षिणे [7]भानोर्वामतो दण्डनायकः । श्रीमहाश्वेतयोः स्थानं पुरतस्त्वंशुमालिनः ॥५१

---

**नारद बोले**—नगर के मध्य भाग में या दिशा के पूर्वभाग अथवा पूरब वाले दरवाजे के समीप भूमि की परीक्षा करके सूर्य मन्दिर का निर्माण कराना चाहिए क्योंकि (मंदिर के लिए) सुगन्ध रस युक्त एवं निम्न भूमि प्रशस्त बतायी गई है ।४१-४२। उसी भाँति रेह वाली भूमि, तुष (भूसी), केश, अस्थि, खार, एवं कोयले वाली भूमि गृह निर्माण के लिए वर्जित की गई है । जहाँ मेघ या नगाड़े की भाँति शब्द सुनाई पड़े, और सभी प्रकार के बीज जहाँ अंकुरित हो सकें, वही भूमि मन्दिर निर्माण के लिए प्रशस्त होती

ततःस्थाप्याश्विनोः स्थानं पूर्वदेवगृहाद्बहिः । द्वितीयायां तु कक्षायां राज्ञास्त्रौषौव्यवस्थितौ ॥५२
तृतीयायां तु कक्षायां स्थितौ कल्माषपक्षिणौ । जण्डकामचरौ[1] स्थाप्यौ दक्षिणां दिशमाश्रितौ ॥५३
उदीच्यां स्थापनीयस्तु कुबेरो लोकपूजितः । उत्तरेण ततस्तस्य रेवतः सविनायकः ॥५४
यत्र वा विद्यते स्थानं दिक्षु सर्वा गुहादयः । द्वे मण्डलेऽर्घ्यदानार्थं कार्ये सव्यापसव्यतः ॥५५
दद्यादुदयवेलायामर्घं सूर्याय दक्षिणे । उत्तरे मण्डले दद्यादर्घ्यमस्तमने रवेः ॥५६
चक्राकृतां तथान्यस्मिन्देवस्य प्रतिमां रवेः । स्थापयेद्विधिवद्वीर चतुर्भिः कलशैः शुभैः[2] ॥५७
नानातूर्यनिनादैश्च [3]शङ्खशब्दैश्च पुष्कलैः । तृतीये मण्डले ह्येव[4] पूजनीयो दिवाकरः ॥५८
चतुरस्रं चतुःशृङ्गं व्योम देवगृहाग्रतः । प्रतिमायास्तु सूत्रेण कार्यं मध्येऽस्य मण्डलम् ॥५९
दिण्डी स्थाप्यः पुरस्तस्मादादित्याभिमुखः स्थितः । यदेतत्कथितं व्योम सर्वदेवमयं मया ॥६०
मध्याह्ने तस्य दातव्यमर्घ्यमत्र यदूत्तम । अथ वा मण्डलं चान्यत्तृतीयं चक्रसम्मितम्[5] ॥६१
स्थापयित्वा तु देवेशं दातव्योऽर्घः सुपण्डितैः । देवस्य पुरतः कार्यं व्योमस्थानं समीपतः ॥
पुस्तकवाचनस्थानमथ वा यत्र रोचते ॥६२

---

महाश्वेता का स्थान सूर्य के सामने होना चाहिए।५१। मन्दिर के बाहर अश्विनी कुमार की स्थापना दूसरी कक्षा (खंड) के राजा स्त्रौव की स्थिति एवं तीसरी कक्षा में कल्माष तथा पक्षी की स्थिति होनी चाहिए। दक्षिण दिशा में जड एवं कामचर उत्तर की ओर लोक वन्दनीय कुबेर की स्थिति होनी चाहिए। उनके उत्तर विनायक समेत रैवत की स्थिति होनी चाहिए।५२-५४। दिशाओं में कहीं भी ... सभी आदि देवताओं की स्थिति करे। इसी प्रकार दक्षिण और

एष स्थानविधिः प्रोक्तो देवतानां यथाक्रमम् । गृहराज्ञोऽथ रुद्रस्तु द्वावेतौ भास्करप्रियौ ॥६३

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने
प्रासादलक्षणवर्णनं नाम त्रिंशदधिकशततमोऽध्यायः ।१३०।

# अथैकत्रिंशदधिकशततमोऽध्यायः

## दारुपरीक्षावर्णनम्

### नारद उवाच

अथ ते सम्प्रवक्ष्यामि प्रतिमाविधिविस्तरम् । सर्वेषामेव देवानामादित्यस्य विशेषतः ॥१
अर्चा[1] सप्तविधा प्रोक्ता भक्तानां शुभवृद्धये । काञ्चनी राजती ताम्री पार्थिवी शैलजा स्मृता ॥२
वार्क्षी चालेख्यका चेति मूर्तिस्थानानि सप्त वै । वार्क्षीविधानं ते वीर वर्णयिष्याम्यशेषतः ॥३
कर्त्रनुकूले दिवसे संवत्सरविशोधिते । शुभैर्निमित्तैः शकुनैः प्रस्थानैश्च वनं विशेत् ॥४
क्षीरिणो वर्जिताः सर्वे दुर्बलास्ते स्वभावतः । चतुष्पथेषु न ग्राह्या ये च पुत्रकवृक्षकाः[2] ॥५
देवतायतनस्था ये तथा वल्मीकसम्भवाः । उत्कीर्णा देवता येषु चैत्यवृक्षाश्च ये स्मृताः ॥६
श्मशानभूमिजा ये च पक्षिणां निलयाश्च ये । सकोटराश्च ये वृक्षाः शुष्काग्रा ये च पादपाः ॥७

---

देवताओं की यह स्थान-विधि बता दी गई । जिनमें गृह राज एवं सर्वतोभद्र नामक प्रासाद (महल) भास्कर के लिए अत्यन्त प्रिय कहे गये हैं ।६३

श्रीभविष्य महापुराण में ब्राह्म पर्व के सप्तमी कल्प में साम्बोपाख्यान में
प्रासादलक्षण वर्णन नामक एक सौ तीसवाँ अध्याय समाप्त ।१३०।

शस्त्रेण निहता ये च कुञ्जराशास्तथा कृताः । सामाद्याः सरुजोऽधश्च व्याधिनश्च तथैव च ।।८
अकाले पुष्पिता ये च काले ते च विवर्जिताः । शीर्णपर्णाश्च तरवो रक्षोध्वांक्षनिषेविताः ।।
एकशाखातिशाखाश्च त्रिशाखाश्च तथाधमाः ।।९
मधूको देवदारुश्च वृक्षराजश्च चन्दनः । बिल्वश्चाम्रातकश्चैव खदिरोथाञ्जनस्तथा ।।१०
निम्बः श्रीपर्णवृक्षश्च पनसः सरलोऽर्ज्जुनः । रक्तचन्दनपर्यन्ताः श्रेष्ठाः स्युः प्रतिमाद्रुमाः ।।११
वर्णानामानुपूर्व्येण द्वौ द्वौ वृक्षौ प्रकीर्तितौ । निम्बाद्याः सर्ववर्णानां वृक्षा साधारणाः स्मृताः ।।१२
कथ्यमानान्विशेषेण शृणु वीर तथापरान् । सुरदारुः शमी चैव मधूकश्चन्दनस्तथा ।।
एते वै तरवस्तात ब्राह्मणानां शुभाः स्मृताः ।।१३
क्षत्रस्य च तथारिष्टः खदिरस्तिन्दुकस्तथा । अश्वत्थश्च तथा साम्ब द्रुमः करकतः शुभः ।।१४
वैश्यानां तद्वदेव स्युः खदिरश्चन्दनस्तथा । पुण्याश्च तरवश्चैते शुभदास्तु तथैव च ।।१५
केसरः सर्जकश्चाम्रः शालवृक्षस्तथेतरः । एते वै तरवः पुण्याः शूद्राणां शुभदायकाः ।।१६
लिङ्गं च प्रतिमां चैवमवस्थाप्य यथाविधि । वृक्षं चाभिमतं गत्वा पूजयेद्बलिपुष्पकैः ।।१७
शुचौ देशे विविक्ते च केशांगारविवर्जिते । प्रागुदक्सूचके देशे लोककष्टविवर्जिते ।।१८
विस्तीर्णस्कन्धविटपः पत्रवानृजुवृद्धिगः । आतङ्कहीनो विवशः सत्त्वक्पर्णः शुभस्तथा ।१९
स्वेनैव पतिता ये च हस्तिभिः पातितास्तथा । शुष्काश्च वह्निदग्धाश्च पक्षिभिश्चापि वर्जिताः ।।२०

---

वाले, असमय में फूलने वाले, समय में पुष्प हीन रहने वाले, छिन्न-भिन्न पत्तेवाले, राक्षस एवं कौवों से सुसेवित, एक शाखा, तथा तीन शाखा वाले वृक्षों का (मूर्ति के लिए) त्याग करना चाहिए ।५-९। उसी भाँति महुवा, देवदारु, वृक्षराज, चन्दन, बेल, आँवले, खैर, अञ्जन, नीम, श्री पर्ण, कटहल, सरलार्जुन, एवं

तरवो वर्जनीयाश्च ग्रहीतव्याः शुभा द्रुमाः । स्निग्धरूपाः सपर्णाश्च सपुष्पाः सफलास्तथा ॥२१
तेषां तु ग्रहणं चाष्टमासेषु कार्त्तिकादिषु । भूत्वा शुभदिने चैव सोपवासोऽधिवासयेत् ॥२२
समन्तादुपलिप्याथ तस्याधस्ताद्वसुन्धराम् । गायत्र्या परिपूतेन परितः प्रोक्ष्य वारिणा ॥२३
शुक्ले च परिधूते च परिधाय च[1] वाससी । पूजयेद्गन्धमाल्यैश्च सधूपबलिकर्मभिः ॥२४
ततः कुशैः परिस्तीर्णे हुत्वाग्नौ तस्य चान्तिके । देवदारुसमिद्भिश्च मन्त्रेणानेन तत्त्ववित् ॥२५
ॐ भूर्भुवः सुवरिति ततो वृक्षं च पूजयेत् ।
ॐ प्रजापतये सत्यसदाय नित्यं श्रेष्ठन्तरात्मन्त्सचराचरात्मन् ॥
सन्निध्यमस्मिन्कुरु देव वृक्षे सूर्यावृतं मण्डलमाविशेश्च नमः ॥२६

## नारद उवाच

एवं सम्पूजयित्वा तु वाक्यैस्तं परिसान्त्वयन् । वृक्षलोकस्य शान्त्यर्थं गच्छ देवालयं शुभम् ॥२७
देव त्वं स्थास्यसे तत्र च्छेददाहविवर्जितः । काले धूपप्रदानेन सपुष्पैर्बलिकर्मभिः ॥२८
लोकास्त्वां पूजयिष्यन्ति ततो यास्यसि निर्वृतिम् । वृक्षमूले कुठारं तु धूपमाल्यैः प्रपूज्य च ॥२९
पूर्वतस्तु शिरः कृत्वा स्थापनीयः प्रयत्नतः । परमान्नमोदकौदनपलपूपिकादिभिर्भक्ष्यैः ॥३०
मद्यैः कुसुमैर्धूपैर्गन्धैश्च तरुं समभ्यर्च्य । सुरपितृपिशाचराक्षसभुजङ्गसुरगणविनायकाद्यानाम् ॥३१
कृत्वा पूजां रात्रौ वृक्षं संस्पृश्य च ब्रूयात् ॥३२

---

पूर्ण रहने वाले वृक्ष शुभ बताये गये हैं ।२०-२१। इस प्रकार कार्तिक आदि आठ मास तक ही उन वृक्ष के ग्रहण करने का विधान है । किसी शुभ दिन में उपवास पूर्वक वहाँ अधिवास करते हुए उस वृक्ष के चारों ओर की भूमि को गोबर से लीप कर गायत्री द्वारा पवित्र किये ...

अर्चासु देवदेव त्वं देवैश्च परिकल्पितः । नमस्ते वृक्ष पूजेयं विधिवत्परिगृह्यताम् ॥३३

यानीह भूतानि वसन्ति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम्।
अन्यत्र वासं परिकल्पयन्तु क्षमन्तु ते चाद्य नमोऽस्तु तेभ्यः ॥३४

प्रभातायां तु शर्वर्यां पुनः सम्पूज्य तं नगम् । ब्राह्मणेभ्यस्ततो दत्त्वा भोजकेभ्यश्च दक्षिणाम् ॥
॥३५
छिन्द्याद्वनस्पतींस्तज्ज्ञैस्तैः कृतस्वस्तिवाचनैः
पूर्वस्यां दिशि पातोऽस्य ऐशान्यां चापि यो भवेत् । अथवा उत्तरस्यां तु तथा छिन्द्यात्तु[?] नान्यथा ॥३६
ऐन्द्र्यैशान्योरुदीच्यां च पातस्तिसृषु शस्यते । नैर्ऋत्याग्नेययाम्यासु दिक्षु पातो न शोभनः ॥
॥३७
वायव्यां चैव वारुण्यां तस्य पातस्तु मध्यमः
यस्य बाह्यस्थिता शाखा दिक्षु नष्टा चतसृषु । वास्तुपूर्वं ततः स्थित्वा ततः पश्चादवस्थिता ॥३८
अविलग्नमशब्दं तु पतनं तु प्रशस्यते । उत्पद्येद्द्विदलं यस्य द्रावश्च मधुरो भवेत् ॥३९
सर्पिस्तैलं क्षरेद्यस्य पादपं तं विवर्जयेत् । शुभदं यदुशार्दूल शृणु त्वं कथये शुचि ॥४०

वृक्षं प्रभाते सलिलैर्निषिक्तं पूर्वोत्तरस्यां दिशि सन्निकृत्य ।
मध्वाज्यदिग्धेन कुठारकेण प्रदक्षिणां शोषमभप्रहण्यात् ॥४१
पूर्वोत्तरेऽप्युत्तरदिग्विभागे पाते यदा वृद्धिकरस्तदा स्यात् ।

---

की है, अतः आप के
कहे ।२९-३२। हे देवाधिदेव ! पूजन के लिए ही देवों ने आपकी कल्पना (सृष्टि) की है, अतः आप के
लिए नमस्कार है । हे वृक्ष इस मेरी विधान पूर्वक पूजा को आप स्वीकार करो तथा इस (वृक्ष) में जितने
(जीव) भूत, आदि रहते हों, विधान पूर्वक दी गई इस बलि को ग्रहण करते हुए कहीं अन्यत्र अपना
... करें मैं उन्हें नमस्कार कर रहा हूँ ।३३-३४। प्रातः में पुनः वृक्ष

आग्नेयकोणक्रमशोऽग्निदाह उग्रोग्ररोगाः सुधनक्षयश्च ।।४२
गारुडे दिशि पाषाणं कपोतो गृहगोधिका । सितवर्णं जलं ज्ञेयमङ्गुष्ठाभं भवेत्कृमिः ।।
दोषैरेतैर्विनिर्मुक्तं मुदा कालं समुद्धरेत् ।।४३

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे दारुपरीक्षावर्णनं नामैकत्रिंशदधिकशततमोऽध्यायः ।१३१।

# अथ द्वात्रिंशदधिकशततमोऽध्यायः

## श्रीसूर्यप्रतिमालक्षणवर्णनम्

### नारद उवाच

हन्त ते सर्वदेवानां प्रतिमालक्षणं परम् । वच्मि ते यदुशार्दूल आदित्यस्य विशेषतः ।।१
एकहस्ता द्विहस्ता वा त्रिहस्ता वा प्रमाणतः । तथा सार्द्धत्रिहस्ता च सवितुः प्रतिमा शुभा ।।२
प्रसादाद्द्वारतो वापि प्रमाणं च प्रकल्पितम् । तद्वत्प्रयाणं कर्तव्यं सततं शुभमिच्छता ।।३
एकहस्ता भवेत्सौम्या द्विहस्ता धनधान्यदा । त्रिहस्ता प्रतिमा भानोः सर्वकामप्रदा स्मृता ।।४
सार्धत्रिहस्ता प्रतिमा सुभिक्षक्षेमकारिणी । अग्रे मध्ये च मूले च प्रतिमा सर्वतः समा ।।
गान्धर्वी सा तु विज्ञेया धनधान्यावहा स्मृता ।।५

---

आदि दिशाओं में गिरे तो, क्रमशः उग्र, एवं उग्रतर रोग, किसी अच्छे धन का विनाश होता है ।४१-४२।

देवागारस्य यद्द्वारं तस्मादष्टांशमुच्यता । त्रिभागैः पिण्डिकाः कार्या द्वौ भागौ प्रतिमा भवेत् ।।६
अङ्गुलैश्च तथा मूर्तिश्चतुरशीतिसंमितैः । विस्तारायामतः कार्या वदनं द्वादशाङ्गुलम् ।।७
मुखात्त्रिभागैश्चिबुकं ललाटं नासिका तथा । कर्णौ नासिकया तुल्यौ पादौ चानियतौ तयोः ।।८
नयने द्व्यंगुले स्यातां त्रिभागा तारका भवेत् । तृतीयतारकाभागात्कुर्याद्दृष्टिं विचक्षणः ।।९
ललाटमस्तकोत्सेधं कुर्यात्तत्सममेव च । परिणाहस्तु शिरसो भवेद्द्वाविंशदङ्गुलः ।।१०
तुल्या नासिकया ग्रीवा मुखेन हृदयांतरम् । मुखमात्रा भवेन्नाभिस्ततो मेढ्रमनन्तरम् ।।
मुखविस्तारणमुरस्ततोऽर्द्धं तु कटिः स्मृता ।।११
बाहू प्रवाहतुल्यौ तु ऊरू जङ्घे च तत्समे । गुल्फाधस्तात्तु पादः स्यादुच्छ्रितश्चतुरङ्गुलः ।।१२
षडङ्गुलसुविस्तारस्तस्याङ्गुष्ठाङ्गुलत्रयम् । प्रदेशिनी च तत्तुल्या हीना शेषा नखैर्युताः ।।१३
चतुर्दशाङ्गुलः पाद आयामात्परिकीर्तितः । एवं लक्षणसंयुक्ता प्रतिमार्च्या भवेत्सदा ।।१४
अंसौ हरेस्तथैवोरू ललाटं च सनासिकम् । नियते नयने गण्डौ मूर्तेः कुर्यात्समुन्नते ।।१५
विशालधवलावामपक्ष्मलायतलोचने । सस्मितानन्पद्मस्य चारुबिम्बाधरस्तथा ।।१६
रत्नप्रोद्भासिमुकुटकटकाङ्गदहारवान् । अव्यङ्गपदमध्यादिसमायोगोऽपि शोभितः ।।१७

---

इसलिए देव-मन्दिर के दरवाजे के विस्तार के आठवें भाग के समान ऊँची प्रतिमा का निर्माण करना चाहिए । उसमें तीसरे भाग के समान ऊँची पिंडिका (मूर्तिस्थापन के लिए चौकी या चबूतरा) और दो भाग के समान प्रतिमा की ऊँचाई बनाये ।६। इस भाँति अपने अंगुल से चौरासी, अंगुल की प्रतिमा का निर्माण कराना चाहिए जिसमें बारह अंगुल का लम्बा-चौड़ा उसका मुख रहता है ।७। एवं मुख के तिहाई ... उसकी चिबुक (ठोढ़ी), और शेष के समान ललाट एवं नासिका की रचना करे । उसी

सुप्रभो मण्डलश्चारुर्विचित्रमणिकुण्डलः । कराभ्यां काञ्चनीं मालां प्रोद्वहन्ससरोरुहाम् ॥१८
एवं लक्षणसंयुक्तां कारयेदीहितप्रदाम् । प्रजाभ्यश्च सदा भानुः शिवारोग्याभयप्रदः ॥१९
अल्पाङ्गायां नृपभयं हीनाङ्गायामकल्पता । खातोदर्यां च क्षुत्पीडा कृशायां तु दरिद्रता ॥२०
सक्षतायां भयं शस्त्रात्स्फुटिता मृत्युकारिणी । दक्षिणावनतायां तु शश्वदायुःक्षयो भवेत् ॥२१
उत्तरावनतायां तु वियोगो भवति ध्रुवम् । नालोक्या नाप्यनालोक्या रक्ष्यामूर्तिः प्रशस्यते ॥२२
तस्माद्भास्करभक्तेन लोकद्वयहितैषिणा । तन्मूर्तेश्चादरः कार्यस्तदधीनास्तु सम्पदः ॥२३
शिरोरुगण्डवदनैः सर्वाङ्गावयवैस्तथा । एवं लक्षणसंपूर्णा प्रतिमा भवते शुभा ॥२४
नासाललाटजङ्घोरुदण्डवक्षोभिरन्विता । कुर्यादादित्यवेषं तु गूढपादोदरं तथा ॥२५
कमलोदरकान्तिनिभः कञ्चुकगुप्तः प्रसन्नमुखः । रक्तोत्पलप्रभामण्डलश्च कर्तुः शुभं करोत्यर्कः ॥२६
कुण्डलभूषितवदनः प्रलम्बहारोऽपि गूहवृत्तः । नृपतिभयं व्यङ्गायां हीनाङ्गायामकल्पना कर्तुः ॥२७
खातोदर्यां क्षुद्भयमर्थविनाशः कृशाङ्गायाम् । मरणं तु सक्षतायां शस्त्रनिपातेन निर्दिशेत्कर्तुः ॥२८
वामोन्नता तु पत्नीं दक्षिणावनता हिनस्त्यायुः । अन्धत्वमूर्द्ध्वदृष्टिः करोति चिन्तामधोमुखी दृष्टिः ॥२९
सर्वप्रतिमास्वेवं शुभाशुभं भास्करेणोक्तम् । ब्रह्मा कमण्डलुकरश्चतुर्मुखः पङ्कजस्थश्च ॥३०

---

दे ।१७। उसका चारु मंडल सुन्दर प्रभा पूर्ण हो और विचित्र मणि कुण्डल को धारण किये, हाथों में सुवर्ण की माला तथा कमल को लिए अभीष्ट प्रदान करने वाली दखायी देती हो । ऐसी प्रजाओं के लिए सूर्य सदैव कल्याण एवं आरोग्य प्रदान करते है ।१८-१९। उसी प्रकार प्रतिमा के अल्पांग होने पर नृप-भय, हीनांग होने पर रोग, उदर बड़ा हो तो भूख की पीड़ा, दुर्बल होने पर दरिद्रता, किसी अंग में क्षत होने पर शास्त्र से भय और फूटी-टूटी प्रतिमा मृत्यु कारक होती है दक्षिण की ओर झुकी रहने से निरंतर आयु क्षय तथा उत्तर की ओर झुकी

स्कन्दः कुमाररूपः शक्तिधरो बर्हिकेतुश्च । शुक्लश्चतुर्विषाणो द्विपो महेन्द्रस्य वज्रपाणित्वम् ।।३१
तिर्यगूर्ध्वललाटसंस्थं तृतीयमपि लोचनं चिह्नम् ।।३२

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने श्रीसूर्यप्रतिमालक्षणवर्णनं नाम द्वात्रिंशदधिकशततमोऽध्यायः ।१३२।

# अथ त्रयस्त्रिंशदधिकशततमोऽध्यायः

## विश्वरूपवर्णनम्

### नारद उवाच

ततोऽधिवासनं कुर्याद्विधिदृष्टेन कर्मणा । ऐशान्यां दिशि वै कुर्यादधिवासनमण्डपम् ।।१
चतुस्तोरणसम्पन्नं सर्वाभरणसंयुतम् । दिशासु विदिशास्वेव पताकाभिस्तु भूषितम् ।।२
आग्नेय्यां दिशि रक्ताः स्युः कृष्णाः स्युर्याम्यनैर्ऋते । श्वेता दिश्यपरस्यां तु वायव्यामेव पाण्डुरा ।।३
चित्रा चोत्तर पार्श्वे तु पीता पूर्वोत्तरे तथा । श्रियमायुर्जयं चैव बलं यशो यदूत्तम ।।४
ददाति सा वीर कृता सम्पदर्धे न संशयः । हिताय सर्वलोकानां मृण्मयी प्रतिमा भवेत् ।।५

---

कुमार रूप, शक्ति के लिए और मयूर आसन एवं ध्वजा से सुशोभित ऐसी प्रतिमा स्कन्द की होनी चाहिए । इसी प्रकार शुक्र वर्ण, एवं चार दाँत वाले हाथी पर बैठे, हाथ में वज्र लिए महेन्द्र की प्रतिमा का निर्माण करना चाहिए ।३१। और शिव की प्रतिमा में भाल के ऊर्ध्व भाग में तीसरी तिर्छी आँख का चिह्न

सुभिक्षक्षेमदा नित्यं सर्वा मणिमयीकृता । गाङ्गेय[1] पुष्टिदा रौप्या स्याद्वै कीर्तिप्रवर्तिनी ।।६
प्रजावृद्धिं ताम्रमयी कुर्यान्नित्यमसंशयः । भूमेर्लाभं तु विपुलं कुर्यादश्ममयी सदा ।।७
प्रधानपुरुषं हन्ति त्रपुलोहमयी सदा । सर्वदेवमयस्यैवमर्चां कुर्यात्प्रयत्नतः ।।८

### साम्ब उवाच

सर्वदेवमयत्वं हि ब्रूहि मे भास्करस्य तु । सर्वदेवमयो ह्येष कथं नारद कथ्यते ।।९

### नारद उवाच

साधु साम्ब महाबाहो शृणु मे परमं वचः । बुधसोमौ स्मृतौ नेत्रे ललाटे चेश्वरः स्थितः ।।१०
सुरज्येष्ठः शिरस्तस्य कपालेऽस्य बृहस्पतिः । एकादश तथा रुद्राः कण्ठमस्य[2] समाश्रिताः ।।११
नक्षत्राणि ग्रहाश्चैव दशनेषु समाश्रिताः । धर्माधर्मौ च देवस्य ओष्ठसम्पुटके स्थितौ ।।१२
सर्वशास्त्रमयी देवी जिह्वायां च सरस्वती । दिशश्च विदिशश्चैव सर्वाः श्रोत्रेषु संस्थिताः ।।१३
ब्रह्मेन्द्रौ तालुदेशे तु स्थितौ देवैश्च पूजितौ । आदित्या द्वादश विभोर्भ्रुवोर्मध्ये समाश्रिताः ।।१४
ऋषयो रोमकूपेषु समुद्रा जठरे स्थिताः । यक्षकिन्नरगन्धर्वाः पिशाचा दानवास्तथा ।।१५
राक्षसाश्च गणाः सर्वे हृदये स्युः स्थिताः रवेः । नद्यो बाहुगताश्चैव नगाः कक्षान्तरे स्थिताः ।।१६
पृष्ठमध्ये स्थितो मेरुः स्तनयोरन्तरे कुजः । तस्य पुत्रो धर्मराजः स्थितो वै नाभिमण्डले ।।१७
कटिदेशे पृथिव्याद्या लिङ्गे सृष्टिः समाश्रिता । जानुनी चाश्विनीदेवावूरू तस्याचला स्मृताः ।।१८

---

एवं क्षेम (कल्याण) प्रदान करती है । और सुवर्ण की प्रतिमा पुष्टि, चाँदी की प्रतिमा कीर्ति, ताँबे की प्रतिमा सन्तान वृद्धि, पत्थर की प्रतिमा, सदैव अत्यन्त भूमि लाभ, एवं शीशे तथा लोहे की मूर्ति प्रधान

सप्त पाताललोकास्तु नखमध्ये समाश्रिताः । ससागरवना पृथ्वी पादमध्येऽस्य वर्तते ॥१९
देवः कालाग्निरुद्रो यो दन्तान्तेषु समाश्रितः । सर्वदेवमयो भानुः सर्वदेवात्मकस्तथा ॥२०
व्यंगेषु वायवश्चैव लोकालोकं चराचरम् । व्याप्तं कर्मशरीरेण वायुना तस्य वै विभोः ॥२१
स एष भगवानर्को भूतानुग्रहणे स्थितः । एतत्ते परमं ज्ञानमेतत्ते परमं पदम् ॥२२
तस्य स्थानविभागेन प्रतिमास्थापनं यथा । तत्ते सर्वं प्रवक्ष्यामि यथोक्तं ब्रह्मणा पुरा ॥२३

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने प्रतिमाप्रतिष्ठाकल्पे विश्वरूपवर्णनं नाम त्रयस्त्रिंशदधिकशततमोऽध्यायः ।१३३।

# अथ चतुस्त्रिंशदधिकशततमोऽध्यायः

## मण्डलविधिवर्णनम्

### नारद उवाच

प्रतिपच्च द्वितीया च चतुर्थी पञ्चमी तथा । दशमी त्रयोदशी चैव पौर्णमासी च कीर्तिता ॥१
सोमो बृहस्पतिश्चैव शुक्रश्चैव बुधस्तथा । एते सौम्या ग्रहाः प्रोक्ताः प्रतिष्ठायज्ञकर्मणि ॥२
त्रिषूत्तरासु रेवत्यामश्विन्यां ब्राह्मभे तथा । पुनर्वस्वोस्तथा हस्ते वासवे[1] श्रवणेऽथवा ॥

---

बतायी गई है ।१८। इस भाँति नख के मध्य में पाताल आदि सात लोक स्थित हैं । इनके चरण के मध्य भाग में सागरों एवं जंगलों समेत पृथ्वी रहती है ।१९। और दाँतों के अन्त में कालाग्नि रुद्र देव वर्तमान हैं । इस प्रकार सर्वदेवमय भानु सर्वदेवात्मक कहे जाते हैं ।२०। प्रकाशित अप्रकाशित चर-अचर स्थानों में व्याप्त वायु की भाँति सूर्य कर्म शरीर रूपी वायु द्वारा समस्त लोकों में व्याप्त हैं । इस भाँति वायु भी

**भरण्यां चैव नक्षत्रे भानोः[१] स्थापनमुत्तमम्** ॥३
**शोधयित्वा तु वै भूमिं तुषकेशविवर्जिताम् । वालुकाङ्गारपाषाणास्थिविहीनां विशोध्य तु ॥४**
**चतुर्हस्तसमायुक्ता वेदी विस्तरतो रवेः[२]** ॥५
**मण्डपस्तु प्रमाणेन दशहस्तः समंततः । मण्डलं वृक्षशाखाभिः कारयेद्विधिपूर्वकम् ॥६**
**नदीसङ्गमतीरोत्थां मृत्तिकां[३] च समानयेत् । उपलिप्य ततो भूमिं कारयेत्कुण्डमुत्तमम् ॥७**
**चतुरस्रं श्रिया युक्तं पूर्वं कुण्डं तु कारयेत् । दक्षिणे चार्धचन्द्रं स्याद्वारुण्यां दिशि वर्तुलम् ॥८**
**पद्माकारं तु वै कुर्यादुत्तरे[४] च विचक्षणः । तोरणानि ततः कुर्यात्पञ्चहस्तानि सुव्रत ॥९**
**न्यग्रोधो दुम्बरौ चैव बिल्वपालाशमेव च । अश्वत्थश्च शमी चैव चन्दनश्चेति कीर्तिताः ॥१०**
**शुक्लवस्त्रसमायुक्तश्चित्रपट्टसमन्वितः । जपमालान्वितः कुर्यात्तोरणानि विचक्षणः ॥११**
**अग्निमीळेति मन्त्रेण यजेद्वै पूर्वतोरणम् । इषेत्वोर्जेति मन्त्रेण यजेद्दक्षिणतोरणम् ॥१२**
**अग्न आयाहीति मन्त्रेण पश्चिमं तु समर्चयेत् । शं नो देवीति मन्त्रेण यजेदुत्तरतोरणम् ॥१३**
**कलशांस्तु समादाय हेमगर्भसमन्वितान् । श्वेतचन्दनपङ्केन कण्ठस्वस्तिकभूषणान् ॥१४**
**यवशालिशरावान्नवस्त्रालङ्कारविग्रहान् । आजिघ्रेति च मन्त्रेण कलशांस्तु निवेशयेत् ॥१५**
**दुकूलश्चित्रपट्टैश्च वेष्टयेत्स्तम्भमालिकाम्[५] । ध्वजादर्शपताकाभिश्चामरैस्तु वितानकैः ॥१६**
**शङ्खघण्टानिनादैश्च गेयमङ्गलवाचनैः । तूर्यभेरीनिनादैश्च वेदध्वनिसमन्वितैः ॥१७**

---

श्रवण, और भरणी नक्षत्रों में सूर्य की प्रतिष्ठा उत्तम बतायी गयी है ।३। ऐसी भूमि का, जिसमें तुष (भूसी), केश, बालू, कोयला, पत्थर, एवं हड्डियाँ न हों, संशोधन करके उसमें चार हाथ की विस्तृत वेदी बनाये ।४-५। मण्डप का प्रमाण दश हाथ का बताया गया है । उसमें विधान पूर्वक

पुण्यैश्च जयशब्दैश्च कारयेत महोत्सवम् । पताकाभिर्विचित्राभिः पूजामाल्योपशोभितम् ॥१८
विचित्रस्रग्वितानाढ्यं प्रकीर्णकुसुमाङ्कुरम् । तन्मध्ये तु कुशास्तीर्णे देवार्चां स्थापयेद् बुधः ॥१९
पताकां पीतवर्णां तु पूर्वे शक्राय दापयेत् । आग्नेय्यां रक्तवर्णाभां[1] [2]यमाशायां यमोपमाम्[3] ॥२०
नीलाञ्जनसमप्रख्यां नैर्ऋत्यां च प्रदापयेत् । वारुण्यां सितवर्णां च कृष्णां वायव्यगोचरे ॥२१
हरितां यक्षराजाय ऐशान्यां सर्ववर्णिकाम् । श्वेतरक्तकचूर्णेन पद्ममालेखयेत्ततः ॥२२
वैद्या वेदीति मन्त्रेण वेद्या आलभनं भवेत् । पूर्वाग्रानुत्तराग्रांश्च कुशानास्तीर्य यत्नतः ॥२३
योगेयोगेति मन्त्रेण कुशैश्चास्तरणं भवेत् । शय्या तत्रैव कर्तव्या दिव्यास्तरणसंयुता ॥२४
गडुके द्वे विचित्रे तु तन्मध्ये स्थापयेद्बुधः । विचित्रदीपमालाभिर्भक्ष्यभोज्यान्नपानकैः ॥२५
पूपकान्सुविचित्रान्वै मोदकांश्च प्रदापयेत् । पायसं कृशरं चैव दध्योदनसमन्वितम् ॥२६
दधि चन्द्रसमप्रख्यं शुभच्छत्रं च विन्यसेत् ॥२७

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने सूर्यप्रतिष्ठायां
मंडलविधिवर्णनं नाम चतुस्त्रिंशदधिकशततमोऽध्यायः ।१३४।

---

ध्वनि द्वारा मुखरित उस महोत्सव को जय जय (कार) शब्दों के महान् कोलाहल समेत सुसम्पन्न करना चाहिए इसी प्रकार विचित्र पताकाओं से भूषित, पूजा की मालाओं से सुशोभित एवं अन्य मालाओंसे अलंकृत उस लम्बी चौडी चाँदनी (चँदोवा) में बिखरे हुए कोमल कली वाले पुष्पों से सुसज्जित उस मण्डल के मध्य में कुशा का स्तरण बिछौना बना कर उसको पुष्पों से आच्छादित करके प्रतिमा पण्डितों

# अथ पञ्चत्रिंशदधिकशततमोऽध्यायः

## प्रतिष्ठास्नानविधिवर्णनम्

### नारद उवाच

अतः परं प्रवक्ष्यामि स्नानकर्मविधिं तव । स्नापकस्तु महाप्राज्ञो ब्राह्मणो वेदपारगः ॥१
अभिज्ञः सौरशास्त्राणामरुणो यदुसत्तम[1] । भोजको भोजकैश्चान्यैर्ब्राह्मणैश्च तथा वृतः ॥२
दिशाभागे मण्डलस्य ईशाने वै यथाक्रमम् । हस्तमात्रप्रमाणं तु भद्रपीठं तु विन्यसेत् ॥३
हस्तिना शकटेनापि भक्त्या ब्रह्मरथेन च । मंगलैर्ब्रह्मघोषैश्च देवं प्रासादमानयेत् ॥४
भद्रपीठं समादाय भद्रं कर्णेति मन्त्रतः । सूत्रधारस्तथा प्रोक्तः शुक्लाम्बरधरः शुचिः ॥५
स्नापयेत्कलशं गृह्य देवदेवं विभावसुम् । सामुद्रं तोयमाहृत्य जाह्नवं यामुनं तथा ॥६
सारस्वतं जलं पुण्यं चान्द्रभागं ससैन्धवम् । पुष्करस्य जलं श्रेष्ठं गिरिप्रस्रवणोदकम् ॥७
अन्यद्वापि शुचि तोयं नदीनदतडागजम् । यथाशक्त्या उपाहृत्य कलशैः काञ्चनादिभिः ॥८
भोजकाश्चाष्टभिः सूर्यं कलशैः स्नापयन्ति वै । ततस्तु मणिरत्नानि सर्वबीजौषधीस्तथा ॥९
सुगन्धीनि च माल्यानि स्थलजान्यम्बुजानि च । चन्दनानि च मुख्यानि गन्धाश्च विविधास्तथा ॥१०

---

# अध्याय १३५

## प्रतिष्ठा स्नानविधि का वर्णन

नारद बोले—इसके उपरान्त सूर्य स्नान-विधानक मैं तुम्हें बताऊँगा मनो ! ।१। जो

ब्राह्मी सुवर्चला मुस्ता विष्णुक्रान्ता शतावरी । दूर्वा च शिबिपुष्पी च प्रियङ्गू रजनी वचा ॥११
सम्भृत्यैतांस्तु सम्भारान्स्नानकर्मविभागवित् । बलाश्वत्थशिरीषाणां पल्लवैः कुशसंयुतैः ॥१२
कलशोपरि विन्यस्य दद्यादर्घ्यं रवेः सदा । काञ्चनै राजतैस्ताम्रैर्मृण्मयैः कलशैस्तथा ॥१३
साक्षतैः सहिरण्यैश्च सर्वौषधिसमन्वितैः । गायत्र्या परिपूतैस्तु षोडशैः स्नापयेद्रविम् ॥१४
कुशोत्तरां[1] ततः कृत्वाः वेदिं पक्वेष्टकामयीम् । तस्यां वेद्यां समारोप्य परिधाप्य च वाससी ।१५
प्रतिमामभिषिञ्चेच्च सोपवासः प्रयत्नतः । मूर्ध्नि सर्वौषधीः कृत्वा तथैवामलकानि च ॥१६
मन्त्रेण मृत्तिकां चापि मन्त्रतश्च जलं तथा । त्वं देवी वन्दिता देवैः सकलैर्दैत्यदानवैः ॥१७
तेन संस्थापिता मूर्ध्नि मया देवस्य शुद्धये । आदिस्त्वं सर्वभूतानां देवतानां च सर्वथा ॥१८
रसानां पतये तुभ्यमाह्वानं च कृतं मया । इत्थं पौराणिकैर्मंत्रैर्वैदिकैश्च विशेषतः ॥१९
कार्यं हि वारुणं स्नानं देवस्य यदुनंदन । इत्थमुच्चारयेद्वाचं कुर्यात्स्नानं विचक्षणः ॥२०
देवास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुशिवादयः । व्योमगङ्गा च पूर्णेन द्वितीयकलशेन तु ॥२१
सारस्वतस्य पूर्णेन कलशेन सुरोत्तम । शक्रादयोभिषिचन्तु लोकपालाः सुरोत्तमाः ॥२२
सागरोदकपूर्णेन चतुर्थकलशो न तु । वारिणा परिपूर्णेन पद्मपत्रसुगन्धिना ॥२३

---

वाली, वच, ये वस्तुएँ पहले अवश्य डाल देनी चाहिए ।, क्योंकि स्नान विधान के ज्ञाता को ऐसा करना आवश्यक बताया गया है । और बरगद, पीपल, एवं शिरीष के कोमल पल्लव तथा कुश, इन्हें कलश के ऊपर रखकर सूर्य के लिए सदैव अर्घ्य प्रदान करना चाहिए । इस प्रकार सुवर्ण, चाँदी, ताँबे, या मिट्टी के कलशों में अक्षत, सुवर्ण, तथा सर्व औषधियाँ डाल कर गायत्री मंत्र से पवित्र किये गये उन सोलहों कलशों

पञ्चमेनाभिषिञ्चन्तु नागाश्च कलशेन तु । हिमवद्धेमकूटाद्याश्चाभिषिञ्चन्तु वारिणा ।।२४
नैर्ऋतोदकपूर्णेन षष्ठेन कलशेन तु । सर्वतीर्थाम्बुपूर्णेन पद्मरेणुसुवासिना ।।२५
सप्तमेनाभिषिञ्चन्तु ऋषयः सप्त ये वराः । वसवश्चाभिषिञ्चन्तु कलशेनाष्टमेन वै ।।२६
अष्टमङ्गलयुक्तेन देवदेव नमोऽस्तु ते । ततो वै कलशैर्दिव्यैः स्नानकर्म समारभेत् ।।२७
समुद्रं गच्छ यः प्रोक्तो मन्त्रमेतमुदीरयेत् । हिरण्यगर्भेति च यो मन्त्रस्तं समुदीरयेत् ।।२८
समुद्रज्येष्ठेति मन्त्रेण क्षालयेन्मृत्तिकान्वितम् । सिनीवालीति मन्त्रेण दद्याद्वल्मीकमृत्तिकाम् ।।२९
शम्युदुम्बरमश्व त्थं न्यग्रोधं च पलाशकम् । यज्ञं यज्ञेति मन्त्रेण दद्यात्पञ्चकषायिकम् ।।३०
पञ्चगव्यं पवित्रं च आहरेत्ताम्रभाजने । गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् ।।३१
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि । तेजोऽसीति घृतं तद्वद्देवस्य त्वा कुशोदकम् ।।३२
एवमादिविधियुतं पञ्चगव्यं प्रकीर्तितम् । या[1] ओषधीति मंत्रेण स्नानमोषधिभिः क्रमात् ।।३३
द्रुपदाभिः पुनस्तस्य कुर्याच्चोद्वर्तनं बुधः । शिरः स्नानं ततो दद्यान्मानस्तोकाभिमन्त्रितम् ।।३४
विष्णोरराटमन्त्रेण दद्याद्गन्धोदकं शुभम् । ततो नद्युद्भवेनैव क्षालयेच्छुद्धवारिणा ।।३५

---

हिमवान् नैर्ऋत्य दिशा में रखे गये छठवें कलशों से तुम्हारा अभिषेक करें ऐसा कहते हुए छठे कलश जल से स्नान करायें । और सभी तीर्थों के जल से पूर्ण, एवं कमल-पराग से वासित उस सातवें कलश के जल से सातों ऋषि गण तुम्हें अभिषिक्त करें । ऐसा कहकर सातवें कलश के जल से तथा आठमंगलों से युक्त उस आठवें कलश जल द्वारा आप का अभिषेक करें अतः देवाधिदेव ! आप के लिए नमस्कार है । इस भाँति की विनम्र प्रार्थना के उपरांत उन आठों दिव्य कलशों के जल से क्रमशः स्नान कराये ।२३-२७। 'समुद्रं गच्छे' वि 'हिरण्य गर्भे' ति, तथा 'समुद्र ज्येष्ठे' ति, इन मंत्रों के उच्चारण पूर्वक उस मूर्ति के शरीर में

जातवेदसमुच्चार्य वस्त्रपूतेन वारिणा । तत आवाहयेद्देवं रक्तमाल्याम्बरं शुभम् ।।३६
एह्येहि भगवन्भानो लोकानुग्रहकारक । यज्ञभागं गृहाणार्घ्यमर्कदेव नमोऽस्तु ते ।।३७
हिरण्येन तु पात्रेण देवायार्घ्यं प्रदापयेत् । इदं विष्णुर्विचक्रमे मन्त्रेणार्घ्यं समर्पयेत् ।।३८
पार्थिवैः प्रथमं कलशैः स्नापयेद्भास्करं बुधः । ततस्त्वौदुम्बरैर्वीर राजतैस्तदनन्तरम् ।।३९
ततस्तु काञ्चनैर्देवं स्नापयेद्यदुनन्दन । सर्वतीर्थजलैर्युक्तं सर्वौषधिसमन्वितम् ।।४०
शङ्खमादाय[1] देवस्य ततो मूर्धनि शङ्कर । दत्त्वा पुष्पाणि देवस्य मूर्ध्नि यत्नाद्विचक्षणः ।।४१
तोयमुत्क्षिप्य यत्नेन ततः स्नपनमाचरेत् । प्रथमं स्नापयेद्देवं वारिणा यदुनन्दन ।।४२
ततस्तु पयसा राजन्पायसेन ततस्तु वै । घृतेन मधुना वापि तथा इक्षुरसेन च ।।४३
अग्निष्टोमस्य यज्ञस्य गोमेधस्य[2] च सुव्रत । ज्योतिष्टोमस्य राजेन्द्र वाजपेयस्य वै विभो ।।४४
राजसूयाश्वमेधाभ्यां घृताद्यैर्लभते फलम् । यस्तु कारयते स्नानं यस्तु भक्त्या प्रपश्यति[3] ।।
क्रियमाणं तु देवस्य स्नानं यदुकलोद्वह ।।४५
य एते कथिता यज्ञा एतेषां क्रमशः फलम् । अर्चां च कुरुशार्दूल दृष्ट्वा वै लभते फलम् ।।४६
स्नानं तु यत्नतः कार्यं देवदेवस्य सुव्रत । यथा न लङ्घयेत्कश्चिद्देवस्य स्नपनं विभोः ।।४७
न प्राश्नन्ति यथा काकास्तीर्थं लोकविगर्हिताः । स्नानोदकं तु देवस्य अथवा पय एव हि ।।४८

---

से छाने गये) जल से क्रमशः स्नान कराये । (इस भाँति सविधि स्नान कराने के उपरांत) लाल रंग के वस्त्र एवं उसी रंग की माला से सुसज्जित कर उसमें प्रति देवता का आवाहन करे ।३५-३६। हे भगवन् ! आइए, आइए ! (इस मूर्ति में अपनी स्थिति कीजिए) लोक के अनुग्रह करने वाले हे देव इस यज्ञ-भाग

भूमौ गतं यथा चैव प्राश्नाति यदुनंदन । रोगं प्राप्नोति कर्ता वै दुःखं कारयिता तथा ।।४९
तस्माद्यत्नेन कर्तव्यं देवस्य स्नपनं विभोः ।।५०
स्नापयित्वा क्रमेणेत्थं स्नानकर्म विधानवित् । ततो वर्धनिकां गृह्य वारिधारां समुत्सृजेत् ।।५१
त्रिवारान्पुरतोऽर्कस्य आचमस्वेति च ब्रुवन् । वेदोसीति च मन्त्रेण उपवीतं प्रदापयेत् ।।५२
बृहस्पतेति मन्त्रेण वस्त्रयुग्मं प्रदापयेत् । यत्नक्रमं प्रकुर्वाणः पुष्पमालां प्रदापयेत् ।।५३
धूरसीति च मन्त्रेण धूपं दद्यात्सगुग्गलम्[1] । समिद्धोञ्जनमन्त्रेण अञ्जनं तु प्रदापयेत् ।।५४
युञ्जानीति च मन्त्रेण रोचनां तस्य दापयेत् । आरार्तिकं च वै कुर्याद्दीर्घायुष्ट्वाय वर्चसे ।।५५
स्नानकर्म त्विदं प्रोक्तं भास्करस्य महात्मनः । भोजका ब्राह्मणाश्चैव क्रियां कुर्युः प्रयत्नतः ।।५६
बह्वृचोऽथर्वणश्चैव छन्दोगोध्वर्युरेव च । स्नापकस्य च चिह्नानि ये च मूर्तिधरास्तथा ।।५७
तेषां प्रवक्ष्यामि विभो शृणु चैकमनाः किल । सम्पूर्णगात्रो मतिमाञ्छास्त्रज्ञः प्रियदर्शनः ।।५८
कुलीनः श्रद्दधानश्च आर्यदेशसमुद्भवः । न स्थूलो न कृशो दीर्घः सौरशास्त्रविशारदः ।।५९
यश्च युक्तो जितात्मा च गुरुभक्तो जितेन्द्रियः । पञ्चविंशतितत्त्वज्ञः स्थापकः समुदाहृतः ।।६०
वर्जनीयांश्च वक्ष्यामि यैस्तु कर्म न कारयेत् । हीनाङ्गश्चाधिकाङ्गश्च वामनो विकटस्तथा ।।६१
नातिगौरो न कृष्णश्च स्नापनाय प्रयोजयेत् । चार्वाको याजकश्चैव नित्यं गोमुखदम्भकः ।।६२

---

स्नान कराये गये दूध या जल का पान न कर सके ।४८। हे यदुनंदन ! क्योंकि भूमि में गिरे हुए उस दूध आदि का पान यदि कोई (निन्दित जीव) करता है, तो कर्ता रोगी हो जाता है और उसके कराने वाले को दुःख की प्राप्ति होती है ।४९। इसलिए विभु सूर्य का स्नान प्रयत्न पूर्वक (गुप्त स्थान में) कराना

अशुचिव्रतसंयुक्तः श्यामदन्तोऽथ मत्सरी[1] । कोपनो[2] दुष्टशीलश्च युवा वा वृद्ध एव च ॥६३
श्वित्री कुष्ठी च रोगी च काणो दुर्मतिरेव च । संकीर्णो जातिहीनश्च तथा न वृषलीपतिः ॥६४
कुब्जश्चांधस्तथा व्यंगः खल्वाटो विकलेन्द्रियः । अविनीतो दुरात्मा च विकलः पङ्गुरेव च ॥६५
तिथिनक्षत्रयोगानां वाराणां च तथा विभो । सूचको जीविकार्थं[3] हि यश्च मूल्येन धाठयेत् ॥६६
ईदृशान्स्नापकान्सर्वान्वर्जयेत प्रयत्नतः । तस्मात्सर्वप्रयत्नेन परीक्ष्याः स्नापका बुधैः ॥६७

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने सूर्यप्रतिष्ठास्नानविधिवर्णनं नाम पञ्चत्रिंशदधिकशततमोऽध्यायः ।१३५।

# अथ षट्त्रिंशदधिकशततमोऽध्यायः

## सूर्यप्रतिष्ठावर्णनम्

### नारद उवाच

अतः परं प्रवक्ष्यामि अधिवासनमुत्तमम् । सहस्रशीर्षा पुरुषो मण्डपं यत्नतो विशेत् ॥१
ततोऽन्ये च शुचौ देशे असंस्पृष्टोपलेपने । मण्डलं पञ्चवर्णैस्तु आलिखेच्चतुरस्रकम् ॥२
पताकातोरणच्छत्रध्वजमाल्याद्यलंकृतम् । विचित्रसुवितानाढ्यं प्रकीर्णकुसुमोत्करैः ॥३

---

चार्वाक (नास्तिक) माचक, गौ के समान मुख वाला, दम्भी, अपवित्रतापूर्ण, काले दाँतों वाला, मत्सरी, क्रोधी । दुःशील, युवा, बृद्ध, सफेद कुष्ठ, रोगी, काना, दुर्बुद्धि, संकीर्ण जाति, जातिहीन, शूद्र जाति की स्त्री का पति, कुबड़ा, अंधा, व्यंग, खल्वाट, विकलेन्द्रिय, शठ, दुरात्मा, विकल, पंगु, (लंगड़ा) तथा हे

तस्य मध्ये कुशास्तीर्णे मूर्तिः स्थाप्या विवस्वतः । तत्रास्यावाहनं कृत्वा दद्यादर्घ्यं विवस्वते ॥४
सुवर्णमधुपर्कादि कृत्वा[1] तत्र विधानतः । देवस्य[2] दर्शयेद्गां च सवत्सां रोहिणीं शुभाम् ॥५
नमो गोपतये तुभ्यं सहस्रांशो प्रसीद मे । एवमर्घ्येण सम्पूज्य परिधाय च वाससी ॥६
यज्ञोपवीतमातिथ्यं तथाभ्यङ्गं तथैव च । वत्सरे वत्सरे तस्य नवमभ्यङ्गमाहरेत् ॥७
श्रावणे मासि राजेन्द्र पवित्रं तस्य तद्धि वै । ब्राह्मणान्भोजयित्वा तु वर्षेवर्षे प्रयोजयेत् ॥८
अभ्यङ्गं यदुशार्दूल श्रावणे मासि भास्करम् । सर्वगन्धैः समालभ्य चन्दनागुरुकुङ्कुमैः ॥९
अलङ्कारैरलङ्कृत्य कुसुमैश्च सुगन्धिभिः । मालाभिश्च विचित्राभिराबद्धाभिरनेकशः ॥१०
ततो धूपं निवेद्याशु प्रतिमाग्रे प्रयत्नतः । सहस्रशीर्षा पुरुषो मण्डपं च प्रवेशयेत् ॥११
नमः शम्भवेति मन्त्रेण शय्यायां विनिवेशयेत् । विश्वतश्चक्षुरित्येव कुर्यात्कमलनिष्कलम् ॥१२
पुनरेव च वक्ष्यामि सङ्कलीकरणं शुभम् । स्नापने तु यथाकार्यः स्वेदेहे न्यास उत्तमः ॥१३
प्रतिमायां तथा कार्यो यथा चालम्भनं बुधः । ॐ हुं खषोल्काय नमो मूलमन्त्रः प्रकीर्तितः ॥१४
आदित्योऽयं स्वयं देवो ह्यक्षरेणोपबृंहितः । ॐकारं विन्यसेन्मूर्ध्नि हुंकारं नासिकोपरि ॥१५
खकारं च ललाटे तु षकारं वदने न्यसेत् । लकारं चैव कंठे तु ककारं हृदये न्यसेत् ॥१६

---

पुष्पों से सुशोभित किया गया है ।३। उपरांत उसके मध्य भाग में कुश का स्तरण (बिछौना) बनाकर सूर्य की मूर्ति उस पर स्थापित करे और आवाहन पूर्वक उन्हें अर्घ्य प्रदान करे ।४। तदनन्तर सुवर्ण तथा मधुपर्क आदि विधान पूर्वक प्रदान कर बछड़े समेत शुभ एवं कल्याण मूर्ति गाय का दर्शन उन्हें कराये ।५। तुम्हें गोपति को नमस्कार है, हे सहस्रांशो ! मेरे ऊपर आप प्रसन्न हो—यह कहते हुए अर्घ्य द्वारा उनकी पूजा करें उन्हें दो वस्त्र धारण कराये ।६। पश्चात् यज्ञोपवीत, अभ्यंग, एवं आतिथ्य सत्कार से उन्हें

यकारं तु भुजे वामे नकारं दक्षिणे भुजे । मकारं वामकुक्षौ च विसर्गं दक्षिणे न्यसेत् ॥१७
ॐकारं तु सदा ध्यायेज्ज्वालामालासमाकुलम् । हुङ्कारं शुद्धवर्णाभं प्रसुवन्तमलं शुभम् ॥१८
खकारं चिन्तयेत्प्राज्ञो भिन्नाञ्जनसमप्रभम् । तरुणादित्यवर्णाभं खकारं चिन्तयेद्बुधः ॥१९
षोकारं तु महाबाहो हेमवर्णं विचिन्तयेत् । शुक्लपद्मनिभाकारमकारं चिंतयेद्बुधः ॥२०
जातीयकुसुमसंकाशं ह्लींकारं सर्ववर्णकम् । क्षीरवर्णं सकारं तु चिन्तयेत्सततं बुधः ॥२१
नकारं हिमकुन्दाभं मकारममृताक्षरम् । ह्लींकारं विद्युत्संकाशं ह्लींकारं सर्ववर्णकम् ॥२२
क्षीरवर्णं सकारं तु चिन्तयेत्सततं बुधः । नकारं स्वर्णवर्णाभं मकारं कनकप्रभम् ॥२३
ततो देवं महात्मानं सहस्रकिरणं रविम् । प्रसादाभिमुखं देवं शयनीये निवेशयेत् ॥२४
अग्निकार्यं ततः कुर्युरग्निकुण्डेषु वै द्विजाः । ततोऽरण्यां समुत्थाप्य अग्निं लौकिकमेव वा ॥२५
प्रज्वाल्याग्निं विधानेन कुर्याद्धोमं विचक्षणः । बह्वृचः पूर्वकाण्डेषु याम्यां मध्यन्दिनस्तथा ॥२६
पश्चिमे चैव च्छन्दोग उत्तरेऽथर्वणो मतः । मध्ये च भोजकः कुर्याद्धोमं यज्ञे यदुत्तम ॥२७
शमीपालाशोदुम्बराणि ह्यपामार्गस्तथैव च । द्वादश तु सहस्राणि अष्टौ चत्वारि एव च ॥२८
द्वे त्रीणि च सहस्राणि अथ वा एकमेव हि । अग्निर्मूर्धेति मन्त्रेण कुण्डस्यालम्भनं भवेत् ॥२९
उल्लिख्याभ्युक्ष्य तेनैव अग्निं दूतमिति स्मृताः । सम्बुध्यस्वाग्ने मन्त्रेण गर्भाधानं तु कारयेत् ॥३०

---

न्यास (स्पर्श) करना चाहिए।१५-१७। उपरान्त ज्वाला रूपी माला से आच्छन्न (अत्यन्त प्रदीप्त) रूप ओंकार का सदा ध्यान करे और शुद्ध वर्ण के समान प्रभापूर्ण, अत्यन्त शुभा वह हुंकार का एवं अंजन (काले) वर्ण के टुकड़े के समान कांति पूर्ण इस खकार का चितन प्राज्ञ को करना चाहिए। जो तरुण सूर्य की प्रभा के समान तेज युक्त है।१८-१९। हे महाबाहो! सुवर्ण के समान कान्ति वाले षोकार तथा श्वेत

सीमन्तेति पुनस्तत्र महामन्त्रेण होमयेत् । जातकर्म तथा प्रोक्तं प्राणायामं विदुर्बुधाः ॥३१
नमः स्वाहेति मन्त्रेण नामकरणमेव च । अन्नप्राशनमन्त्रेण अन्नप्राशनमादिशेत् ॥३२
ज्येष्ठमग्रेति मन्त्रेण तेन चूडोपकर्मणि । व्रतबन्धस्य मन्त्रेण व्रतबन्धं समादिशेत् ॥३३
समावर्तनमित्येव आकृष्णेति च होमयेत् । पत्नीसंयोजनं चैव स्वयमेव प्रकल्पयेत् ॥३४
अग्निहोत्रादिकं कर्म यज्ञकर्माणि यानि च । महाव्याहृतिमन्त्रेण होतव्यानि समन्ततः ॥३५
मातृ णां यज्ञभूतानां बलिकर्म प्रदापयेत् । सर्वकामसमृद्ध्यर्थं कारयेदधिवासनम् ॥३६
त्रिरात्रं पञ्चरात्रं च अहोरात्रमथापि वा । ततः स्वलङ्कृतां स्नातां मणिरत्नैर्विभूषिताम् ॥३७
कृतरक्षां प्रयत्नेन प्रतिमामधिवासयेत् । देवागारादथैशाने दिग्भागे दिव्यमन्दिरम् ॥३८
कृत्वा कुशपरिस्तीर्णे वरास्तरणसंवृते । पूर्वशीर्षां तथा शय्यां शुक्लां शुक्लाम्बरोत्तराम् ॥३९
तस्यामावेशयेत्सम्यङ्महाश्वेतमुपाहरेत् । निक्षुभा[१] दक्षिणे पार्श्वे वामे राज्ञी च कीर्तिता ॥४०
दण्डपिङ्गालकौ चास्य स्थितौ पादप्रवेशितौ । तस्यां संवेशितायां तु शर्वर्यां प्रतिमां रवेः ॥४१
वसेत्तां रजनीं तत्र स्तूयमानश्चतुर्दिशम् । ब्राह्मणैर्बन्दिभिश्चापि गीतज्ञैश्चारणैस्तथा ॥४२
कुर्याज्जागरणं तत्र सूर्यभक्तिसमन्वितैः । प्रभातायां तु शर्वर्यां बोधयेद्दृग्विधानतः ॥४३

---

करे पश्चात् उसी भाँति जातकर्म और प्राणायाम के करने को विद्वानों ने बताया है ।३१। फिर 'नमः स्वाहे' ति मंत्र के उच्चारण पूर्वक उनका नामकरण, अन्नप्राशन-मंत्र का उच्चारण करते हुए अन्नप्राशन 'ज्येष्ठ मग्रे' ति मंत्र के उच्चारण पूर्वक चूड़ाकरण एवं व्रत-बंधके मंत्रों से व्रतबंध (यज्ञोपवीत) करके 'आकृष्णे' ति मंत्र के उच्चारणपूर्वक हवन कर्म जो समावर्तन कर्म कहा गया है सुसम्पन्न करे । तदुपरांत पत्नी संयोजन (विवाह) विधान स्वयं संपन्न करना चाहिए ।३२-३४। इस प्रकार अग्नि होमादि कर्म

हविष्यं भोक्तुकामांस्तु ब्राह्मणान्भोजकांस्तथा। दक्षिणाभिश्च सम्पूज्य तैः कृतस्वस्तिवाचनः ॥४४
ततो गर्भगृहस्थाय मध्ये कृत्वा तु पिण्डिकाम्। विधिवत्तत्र सौवर्णं न्यसेत्सप्तहयं रथम् ॥४५
सर्वबीजौषधैश्चैव तत्र धृत्वा विधानवित्। दत्त्वार्घ्यं स्थापयेत्तत्र यजमानः सहायवान् ॥४६
शङ्खदुन्दुभिनिर्घोषैर्जलधारासहाक्षतैः। कृत्वा पुण्याहशब्दं तु आलयस्य प्रदक्षिणाम् ॥४७
शुभलग्ने दिने ऋक्षे पूर्वाह्ले भानवे क्षणे। मुहूर्ते च शुभे भानोः प्रतिमां स्थापयेद्बुधः ॥४८
नाधोमुखीं नोर्ध्वमुखीं न पार्श्वावनतां तथा। समामभिमुखीं चेमां प्रतिमां तु निवेशयेत् ॥४९
पत्यौ चास्य ततः सम्यक्पार्श्वयोर्विनिवेशयेत्। निक्षुभा दक्षिणे पार्श्वे रवे राज्ञी तु वामतः ॥५०
ततस्तदुपहारार्थं सम्भारैः प्राक्समाहृतैः। मोदकायूषिकापूपशष्कुलीभूतशीर्षकैः ॥५१
कृशरैः पायसोन्मिश्रैः सर्वदिक्षु क्षिपेद्बलिम्। इन्द्राय देवपतये बलिने वज्रपाणये ॥५२
शतयज्ञाधिपतये तस्मै इन्द्राय ते नमः। त्रातारमिन्द्रमन्त्रेण इन्द्रस्यावाहनं भवेत् ॥५३
अग्नये रक्तनेत्राय ज्वालामालार्चिताय वै। शक्तिहस्ताय तीव्राय तथा चैवाजवाहिने ॥
आग्नेय्यामग्निमन्त्रेण वह्नेरावाहनं स्मृतम् ॥५४
दण्डहस्ताय कृष्णाय महिषोत्तमवाहिने। सूर्यपुत्राय देवाय धर्मराजाय वै नमः ॥५५
यमाय त्विति मन्त्रेण मुद्रास्तस्यैव कीर्तिताः। नैर्ऋते खड्गहस्ताय नीललोहितकाय च ॥५६

---

चाहिए।४१-४३। इस भाँति हविष्य भोजन के इच्छुक उन ब्राह्मणों एवं भोजकों की दक्षिणा समेत पूजा करके उनके द्वारा स्वस्ति वाचन कराये।४४। और गर्भ गृह के मध्य में पिंडिका (वेदी या चौकी) रख कर उस पर सुवर्ण के सात घोड़े समेत उस सुवर्ण निर्मित रथ की स्थापना करे।४५। और सविधान समस्त बीज एवं औषधियां रख कर वहाँ पत्नी समेत यजमान को सूर्य के लिए अर्घ्य प्रदान करना

सर्वबाह्याधिपतये विरूपाख्याय वै नमः । आंयं गौरिति मन्त्रेण नैर्ऋत्यां तु प्रकल्पयेत् ॥५७
वारुण्यां पाशहस्ताय वरुणायेति कल्पयेत् । मन्त्रेणावाहनं विद्यात्पञ्चनद्यः सरस्वतीम् ॥५८
प्राणात्मकाय धूपाय अव्यङ्गायानिलाय च । ध्वजहस्ताय भीमाय नमो गन्धवहाय च ॥५९
तस्याप्यावाहनं विद्याद्यद्देवादेवहेडनम् । गदाहस्ताय सोमाय शुष्मिणे नृगताय च ॥६०
गदापट्टिशहस्ताय सोमराजाय वै नमः । ईशावास्यं च गुह्या वै सोममन्त्रः प्रकीर्तितः ॥६१
चतुर्मुखाय देवाय पद्मासनगताय च । कृष्णाजिननिषण्णाय नमो लम्बोदराय च ॥६२
गणाधिपतये देव नीलकण्ठाय शूलिने । विरूपाक्षाय रुद्राय त्रैलोक्याधिपते नमः ॥
अभि त्वा शूर नो मन्त्र ईशानाय प्रकल्पयेत् ॥६३
सर्वनागाधिराजाय श्वेतवर्णाय भोगिने । सहस्रफणिने नित्यमनन्ताय नमोनमः ॥६४
नमोऽस्तु सर्पेभ्य इति मन्त्रश्चैव प्रकीर्तितः । पञ्चरात्रादिभिर्न्यासो ह्यंगन्यासः प्रयुज्यते ॥६५
तथोपक्षीरपानैश्च स्तुतिस्तोत्रैश्च भास्करम् । विप्रेभ्यो भोजकेभ्यश्च ततो दद्याच्च दक्षिणाम् ॥६६
सूर्यक्रतुं महापुण्यं नैव कुर्याददक्षिणम् । स्थाप्यतेऽनेन विधिना तद्भक्तैः प्रतिमा च या ॥६७
सा तु वृद्धिकरा नित्यं सान्निध्याच्च सदा भवेत् । सप्तजन्मसु तेषां तु न रोगाः सम्भवन्ति हि ॥६८
उपासते त्रिरात्रं ये भानोर्यात्राभिवासने । गन्धमाल्योपहारैस्तु ते यान्ति भुवनं रवेः ॥६९

---

में खड्ग लिए नील, एवं लोहित (रक्त) वर्ण वाले, समस्त बाह्य के अभिनायक उस विरूप के लिए नमस्कार है, यह कहते हुए उन्हें बल प्रदान करे और 'अयं गौरी' इस मंत्र के उच्चारण पूर्वक उनका आवाहन करके नैर्ऋत्य दिशा में उन्हें स्थापित करे।५५-५७। उसी भाँति पाश हाथ में लिए उनके लिए पश्चिम दिशा में बलि प्रदान करते हुए 'पं चनद्यः सरस्वतीम्' इस मंत्र से उनका भी आवाहन करना चाहिए।५८। प्राणात्मक, धूप, अभ्यंग, हाथ में ध्वजा लिये गन्धवह वायु के लिए नमस्कार है, इसके उच्चारण पूर्वक वायु के लिए बलि

आत्मीयं परकीयं वा प्रतिमास्थापनं रवेः। यः पश्यति पुमान्भक्त्या स स्वर्लोकमवाप्नुयात् ॥७०
दशानामश्वमेधानां वाजपेयशतस्य च। फलं प्राप्नोति पुरुषः प्रतिष्ठाप्य दिवाकरम् ॥७१
यावत्कीर्तिः पुण्यकृता भानोः स्थाने निवेशिते। तावत्स तु यदुश्रेष्ठ सूर्यलोके महीयते ॥७२
स्थापने चास्य वै मन्त्रः प्रोक्तो लोकेषु पूजितः। ध्रुवा द्यौश्च ध्रुवा पृथ्वी ध्रुवं विश्वमिदं जगत् ॥
श्रेयसे यजमानस्य तथा त्वं ध्रुवतां व्रज ॥७३
स्थापयित्वा रविं भक्त्या विधिदृष्टेन कर्मणा। मासे मासे ऋतुफलं लभन्ते नात्र संशयः ॥७४
एकाहेनापि यद्भानोः पूजया प्राप्यते फलम्। न तु क्रतुशतैर्वीर प्राप्यते मानवैर्भुवि ॥७५
कृत्वापि सुमहत्पापं यः पश्चात्सेवते रविम्। स याति सूर्यलोकं तु नरो विगतकल्मषः ॥७६
न भवेदिष्टकानां च द्रवणं भूमिसंमिति। स्वर्गे महीयते तावत्कारको देववेश्मनः ॥७७
खण्डस्फुटितसंस्कारं कृत्वा यत्फलमाप्यते। न तु क्रतुसहस्रैस्तु प्राप्यते फलमुत्तमम् ॥७८
सिकतायामपि गृहं यस्तु कुर्याद्विभावसोः। गोपतेः स प्रियसदः प्रगच्छेद्गोपतेर्वरम् ॥७९

इत्येवं सुरवरस्य तस्य भानोर्भूतानां स्थितिनिलयप्रसूतिहेतोः।
श्रीभागी भवति नरो निकेतकारी कल्पानां वसति शतं स सूर्यलोके ॥८०

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने सूर्यप्रतिष्ठावर्णनं नाम षट्त्रिंशदधिकशततमोऽध्यायः ।१३६।

---

इस भाँति अपने द्वारा अथवा कहीं किसी दूसरे के द्वारा किये गये सूर्य की प्रतिमा के स्थापन-विधान को भक्ति पूर्वक जो देखता है, उसे स्वर्गलोक की प्राप्ति होती है ।७०। क्योंकि दश अश्वमेध एवं सौ वाजपेय यज्ञों के फल, सूर्य (मूर्ति) की प्रतिष्ठा करने वाले पुरुष को प्राप्त होते हैं ।७१। हे यदुश्रेष्ठ ! सूर्य की प्रतिमा को

# अथ सप्तत्रिंशदधिकशततमोऽध्यायः

## प्रतिष्ठापनविधिवर्णनम्

### नारद उवाच

यः प्रासादं रचयति पुमान्देवतानां प्रयत्नात्तत्र प्रीत्या सपदि कुरुते स्थापनं भानुभक्तः।
दिव्यान्भोगाँल्लभति च सदा कामतश्चाप्रमेयांस्तान्भुक्त्वासौ पुनरपि भवेच्चक्रवर्ती पृथिव्याम् ॥१

ये मानवास्त्रिदशमूर्तिनिकेतनानि कुर्वन्ति साधुजनदृष्टिमनोहराणि।
तेषां मृतेऽप्यपरमार्थमये शरीरे लोके परिभ्रमति कीर्तिमयं शरीरम् ॥२

इति ते कथितमिदं देवपूज्यस्य सवितुः स्थापनमिवाधानम्।
साधारणं विधानं शृणु देवानां प्रतिष्ठापने वीर ॥३

स्नातो भुक्तो वस्त्रालङ्कृतकुसुमैर्गन्धैः प्रतिमाया आस्तीर्णायां शय्यायां स्थापनं कुर्यात्।
सुप्तायां तु स नृत्यगीतैर्जागरणैः सम्यगेवाधिवास्य दैवज्ञेन प्रतिदिष्टकाले संस्थापनं कुर्यात्।
अभ्यर्च्य कुसुमगन्धानुलेपनैः शङ्खतूर्यनिर्घोषैः प्रादक्षिण्येन नयेदायतनस्य प्रयत्नेन कृत्वा बलिं

---

# अध्याय १३७

## प्रतिष्ठापन विधि का वर्णन

**नारद बोले**—जो सूर्य भक्त पुरुष प्रयत्न पूर्वक विशाल देव मन्दिर का निर्माण करके उसमें

प्रतिमामभ्यर्च्य ब्राह्मणांश्च साधून्दत्त्वा हिरण्यकलशं विधिना निक्षिपेत्पिण्डिकामध्ये सुश्वभ्रे
स्थापकदै वज्ञद्विजान्सम्यग्विशेषतोऽभ्यर्च्याकल्पान्तं भोगी भवतीह परत्र सुखी ॥४
विष्णोर्भागवता मताश्च सवितुः शम्भोः सभस्मद्विजा मातॄणामपि मातृमण्डलविदो विप्रा विदुर्ब्राह्मणाः।
सर्वे यस्य विमुक्तशुक्लवसना बुद्धस्य रक्ताम्बरा ये यं देवमुपाश्रिताः सुविधिना तैस्तस्य कार्या क्रिया ॥५
सामान्यमिदं देवानामधिवासनं भवति मया कथितम्। क्रियमाणमिदं दृष्ट्वा देवानां प्रतिष्ठापनम् ॥
॥६
नरो भक्त्या इह कामानवाप्य स्वर्गभाजनं भवति
इदं ते कथितं राजन्प्रतिष्ठापनमादितः। यत्कृत्वा सवितुः स्नानं नरो याति मनोगतिम् ॥७
इत्थं कुर्यान्नरो भक्त्या सवितुः स्थापनं बुधः। कारयेत्पुरतो भक्त्या सवितुः स्थापनं बुधः ॥८
इतिहासपुराणस्य श्रवणं पापनाशनम्। ताभ्यां हि श्रवणाद्वीर सान्निध्यं याति भास्करः ॥९
कृते त्वायतने तस्मिन्ये चान्ये चापि देवताः। तस्मात्कार्यं बुधैर्नित्यं धर्मश्रवणमादितः ॥१०
वाचकं पूजयित्वा तु ब्राह्मणानुपपूज्य च। कारयेद्वाचनं वीर पुस्तकस्याग्रतो रवेः ॥११
सर्वस्वं स्थापके दद्याद्यत्किञ्चिद्गृहमागतम्। गोदानमथवा दद्यात्तस्य चित्तं प्रसादयेत् ॥१२

---

स्वच्छ मध्य भाग में प्रतिष्ठित करे। क्योंकि ऐसे समय ज्योतिषी, एवं ब्राह्मणों की भली भाँति अर्चना करने वाला पुरुष, कल्प की समाप्ति पर्यंत सुखों का उपभोग यहाँ वहाँ (लोक परलोक में) सदैव करता रहता है।४। इस प्रकार विष्णु के भागवत (वैष्णव), सूर्य के भग (भोजक) शिव के भस्म भूषित ब्राह्मण,

इत्येष कथितो वीर प्रतिष्ठाकल्प आदितः। कृत्वा दृष्ट्वा च श्रुत्वा च यं नरोऽर्कमवाप्नुयात् ॥१३

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने प्रतिष्ठापनविधिवर्णनम् नाम सप्तत्रिंशदधिकशततमोऽध्यायः।१३७।

# अथाष्टत्रिंशदधिकशततमोऽध्यायः

## ध्वजारोपणविधिवर्णनम्

### नारद उवाच

हन्त ते कथयिष्यामि ध्वजारोपणमुत्तमम्। यदुक्तं ब्रह्मणा पूर्वमृषभाधिपते पुरः ॥१
पुरा देवासुरे युद्धे यानि देवैर्जयेप्सुभिः। कृतान्युपरि चिह्नानि वाहनानि ध्वजानि तु ॥२
लक्ष्मचिह्नध्वजं केतुरिति पर्यायनामभिः। कीर्तितः स च तस्येह प्रमाणं गदतः शृणु ॥३
ध्वजो वंशस्य कर्तव्यस्त्वविद्ध ऋजुरव्रणः। प्रासादव्यास तुल्यस्य ध्वजवंशप्रमाणतः ॥४
देवागारस्य ये प्रोक्ता मञ्जरीकलशादयः। अथ वा तत्प्रमाणस्तु ध्वजदण्डः प्रकीर्तितः ॥५
अन्तर्गृहस्य या वेदी सूत्रतः परिकल्पिता। तस्या व्यासो भवेद्वंशः प्रसादस्य यदुत्तम ॥६
अथ वा मूलसूत्रेण यो व्यासोऽन्तर्गृहस्य तु। प्रासादव्यास इति ते प्रोक्तश्चेह न संशयः ॥७

---

प्रसन्न करना चाहिए।१२। हे वीर! इस प्रकार प्रतिष्ठा विधान प्रारम्भ से अन्त तक मैंने तुम्हें सुना दिया, जिसे करने या देखने से मनुष्य सूर्य लोक की प्राप्ति करता है।१३

श्री भविष्य महापुराण में ब्राह्मपर्व के सप्तमी कल्प के साम्बोपाख्यान में

केतुर्भवेद्वरो वंशो न निम्नो न ऋजुस्तथा । पत्रं ध्वजे युगं चैव नलिकापुरुषस्तथा ।।८
चतुर्हस्ता भवन्त्येते प्रशस्ताः कृष्णनन्दन । अष्टहस्तप्रमाणस्तु विंशार्धस्य[1] प्रमाणतः ।।९
सामान्यो ध्वजदण्डस्तु सर्वसाधारणो मतः । दण्डपाणिध्वजो यस्तु स्मृतः षोडशहस्तवान् ।।१०
विंशद्धस्तात्परो दण्डो न कार्यः सर्वथा[2] रवेः । युग्महस्तस्तु कर्तव्यो ध्वजदण्डो मनीषिभिः ।।११
चतुरङ्गुलविस्तीर्णः सुवृत्तो द्व्यङ्गुलोपरि । नातिसूक्ष्मो न च स्थूलो न कार्यो नतपर्वकः ।।१२
समपर्वातु कर्तव्यः सुदृढः सूक्ष्म एव हि । वक्रः पुत्रविनाशाय सव्रणोऽर्थविनाशनः ।।१३
रोगदो युग्महस्तस्तु भिन्नो दुःखमनन्तकम् । करोति हानि धर्मस्यहीनो यस्तु प्रमाणतः ।।१४
वैषम्यमसमपर्वा दद्यात्कृच्छ्रमधोन्नतः । जयो जयन्तो जैत्रेयः[4] शत्रुहन्ता जयावहः ।।१५
नन्दोपनन्दनौ चैवेन्द्रोपेन्द्रौ गदितौ तथा । दशैते कीर्तिता भेदा ध्वजस्यानन्दसम्मिताः ।।१६
द्विजहस्तस्तु जयो दण्डो जयन्तो द्विगुणो मतः । द्वादशहस्तस्तु जैत्रेयः शत्रुहन्ता कलान्वितः ।।१७
जयावहस्तु विंशार्धो नन्द आदित्यसन्निभः । चतुर्दशोपनन्दस्तु इन्द्रः षोडश उच्यते ।।१८
उपेन्द्रोऽष्टादशः[5] प्रोक्तस्तथेन्द्रो विंशतिः स्मृतः । भिन्नो वक्रोऽसाधितश्च न कार्यो दण्ड एव हि ।।१९
मूलमन्त्रेण कर्तव्यो व्यासतोऽन्तर्गृहस्य तु । ध्वजदण्डो महाबाहो अथ वा वास्तुमानतः ।।२०

---

ध्वजदण्ड होना चाहिए, जो न नीचा हो, और न टेढ़ा । ध्वज में चार पत्र लगने चाहिए तथा नलिका पुरुष भी ।८। हे कृष्णनन्दन ! यद्यपि चार हांथ का (लम्बा) ध्वज दण्ड प्रशस्त बताया गया है । और आठ हाथ (लम्बे) प्रमाण का एवं दश हाथ के (लम्बे) प्रमाण का भी ध्वज-दण्ड होता है, पर ये सभी सामान्य ध्वज-दण्ड हैं, ऐसी सर्व साधारणों की सम्मति है । दण्डपाणि ध्वज, जिसे कहा जाता है, वह सोलह हाथ का (लम्बा) बताया गया है । सूर्य के लिए ध्वज-दण्ड (किसी भी दशा में) बीस हांथ से अधिक लम्बा

मञ्जरीमानतो वापि तदर्धेनाथवा विभो । पताका वै शुभा कार्या ध्वजवंशावलम्बिनी ।।२१
देवागारस्य शिखरात्त्रिभागपरिमार्जनी । सा प्रोक्ता दशधा वीर मानतोमानतस्तथा ।।२२
अङ्कुरः पल्लवश्चैव स्कन्धः शाखा तथैव च । पताका कदली वीर केतुर्लक्ष्म जयस्तथा ।।२३
ध्वजश्च दशमः प्रोक्तः सर्वदेवमयोव्ययः । अङ्कुरो द्व्यंगुलः प्रोक्तः पल्लवश्चतुरङ्गुलः ।।२४
स्कन्धः षडङ्गुलः प्रोक्तः शाखा चाष्टाङ्गुलो मता । एकादशपताका तु कदली च चतुर्दश ।।२५
केतुस्तु षोडशः प्रोक्तो लक्ष्माष्टादशमुच्यते । जया विंशति वै प्रोक्ता एतावत्त्वङ्गुलानि तु ।।२६
देवागारस्य कुम्भस्य प्रसन्ना सा प्रमार्जनी । अङ्कुरेति पताका सा विज्ञेया यदुनन्दन ।।२७
पल्लवेति द्वितीयस्य मार्जनी परिकीर्तिता । त्रिभागमार्जनीस्कन्धः शाखा वै पञ्चमस्य तु ।।२८
षष्ठस्योक्ता पताका तु कदली सप्तमस्य तु । अष्टमस्य तथा केतुर्लक्ष्म च नवमस्य तु ।।२९
ततस्तु दशमः प्रोक्तो जयन्तो यदुनन्दन । वृषस्थानावमार्गी तु ध्वजस्तु परिकीर्तितः ।।३०
गजो मेषोऽथ महिषः कबन्धस्तु वृषस्तथा । हरिणोऽथ नरश्चैव नरश्च नरसत्तम ।।३१
स्थानान्येतानि भूयोऽथ[1] प्रयुक्तस्य ध्वजस्य तु । दिशभागे तु पूर्वात्तु क्रमेण परिकल्पयेत् ।।३२
एवं दशविधा प्रोक्ता पताका तत्त्वदर्शिभिः । कर्तव्या सा यथापूर्वं तच्छृणु त्वं नराधिप ।।३३

अथवा वास्तु (गृह) मान के समान ।२०। हे विभो ! इस भाँति मंजरी, या उसके अर्ध भाग के समान भी ध्वज दण्ड बनाया जा सकता है । ध्वज दण्ड मे लटकने वाली पताका को भी कल्याण मूर्ति ही बनाना चाहिए ।२१। हे वीर ! देव मंदिर के शिखर के ऊपर तीन भाग को शुद्ध करने के लिए स्थित वह पताका मान अमान (नपी तथा विना नपी हुई) के भेद से दश प्रकार की होती है ।२२। हे वीर ! अंकुर, पल्लव, स्कन्ध, शाखा, पताका, कंदली, केतु, लक्ष्म जय एवं ध्वज, यही दश भेद उसके बताये गये हैं । इस प्रकार

शुक्लवस्त्रमयी चित्रा सघण्टा सुमनोहरा । नानाचामरसम्पन्ना किङ्किणीजालमण्डिता ।।३४
ध्वजाग्रे चैव कर्तव्यो देवतालिङ्गसूचकः । काञ्चनो वाथ रौप्यो वा मणिरत्नमयोऽपि वा ।।३५
रङ्गकैर्लिख्यते वापि तद्वाहनसमाकृतिः । ध्वजदण्डोऽत्र विन्यस्तः कर्तव्यो यदुनन्दन ।।३६
गरुमात्मांस्तु ध्वजो विष्णोरीश्वरस्य ध्वजो वृषः । ब्रह्मणः पङ्कजं कार्यं रवेर्धर्मः स्मृतो ध्वजः ।।३७
हंसो[1] जलाधिपस्योक्तः सोमस्य तु नरो ध्वजः । बलदेवस्य कालस्तु कामस्य मकरध्वजः ।।३८
सिंहो ध्वजस्तु दुर्गायाः कीर्तितो यदुनन्दन । गोधा चापि उमादेव्या रैवतस्य हयः स्मृतः ।।३९
कच्छपो वरुणस्योक्तो वातस्य हरिणो मतः । पावकस्य तथा मेष आखुर्गणपतेर्मतः ।।४०
ब्रह्मर्षीणां कुशः प्रोक्त इत्येषा ध्वज कल्पना । यस्य यद्वाहनं प्रोक्तं तत्तस्य ध्वज उच्यते ।।४१
विष्णोर्ध्वजे तु सौवर्णं दण्डं कुर्याद्विचक्षणः । पताका चापि पीता स्याद्गरुडस्य समीपगा ।।४२
ईश्वरस्य ध्वजे दण्डो राजतो यदुनन्दनः । पताका चापि शुक्ला स्याद्वृषभस्य समीपगा ।।४३
पितामहध्वजे दण्डः स्मृतस्ताम्रमयो बुधैः । पद्मवर्णा पताका स्यात्पङ्कजस्य समीपगा ।।४४
आदित्यस्य च सौवर्णो ध्वजे दण्डः प्रकीर्तितः । पञ्चवर्णा पताका स्याद्धर्मस्याधोगता नृप ।।४५

---

किस प्रकार होना चाहिए, मैं बता रहा हूँ, सुनो ! ।३३। सफेद वस्त्र की बनी हुई चित्र-विचित्र, घंटा समेत, अत्यन्त मनोरम, भाँति-भाँति के चामरों से सुशोभित एवं छोटी-छोटी घंटियों के समूहों से विभूषित पताका होनी चाहिए ।३४। और ध्वजा के अग्रभाग में देवता-सूचक (जिसे देवता के लिए बताया गया हो उसे सूचित करने वाला) चिह्न बना देना चाहिए । उसी भाँति सुवर्ण, चाँदी, मणि, एवं रत्नों में किसी के द्वारा अथवा रंग के द्वारा उस (देवता) के वाहन के समान आकृति निर्माण (चिह्न) भी

किङ्किणीजालसम्पन्ना नानबुद्बुदसन्निभा । पुष्पमालोपसम्पन्ना नानावादिभिरावृता ॥४६
दण्ड इन्द्रध्वजस्योक्तः काञ्चनो यदुनन्दन । पताका बहुवर्णा स्यात्कुञ्जरस्य समीपगा ॥४७
आयसश्चापि दण्डोक्तो यमचिह्नं विचक्षणैः । पताका वर्णतः कृष्णा महिषस्य समीपगा ॥४८
जलाधिपध्वजो दण्डो राजतः परिकीर्तितः । पताका सर्वतः श्वेता विचित्रा सा च कथ्यते ॥४९
ध्वजे चापि कुबेरस्य दण्डो मणिमयः स्मृतः । पताका चापि रक्ता स्यान्नरपादसमीपगा ॥५०
बलदेवध्वजे दण्डो राजतो यदुनन्दन । पताका वर्णतः शुक्ला तालस्याधोगता स्मृता ॥५१
कामध्वजे त्रिलोहः स्याद्दण्डो यदुकुलोद्वह । पताका रोहिणी तत्र मकरस्य समीपगा ॥५२
मायूरं कार्त्तिकेयस्य चिह्नं लोकेषु गीयते । त्रिलोहदण्डमारूढं बहुरत्नविभूषितम् ॥५३
बहुवर्णकचित्रा तु पताका कथिता बुधैः । हस्तिदन्तभवं दण्डं कुर्याद्गणपतेर्नृप ॥५४
ताम्रदण्डं समारुढं संशुद्धं सम्प्रतिष्ठितम् । शुक्ला पताका कर्तव्या सुप्रमाणा महीपते ॥५५
मातॄणां चापि कर्तव्यो नैकरूपो ध्वजो बुधैः । पताकाभिरनेकाभिर्बहुरत्नाभिरन्वितः ॥५६
रेवतस्यापि कर्तव्यो ध्वजो वाजी नराधिप । रक्ता पताका तत्रापि कर्तव्या यदुनन्दन ॥५७
चामुण्डामन्दिरे कार्यः शिरोमालाकुलो ध्वजः । नीला पताका कर्तव्या दण्डो लोहमयस्तथा ॥५८
रतीमयश्च मातॄणां रेवतस्य च कारयेत् । गौर्या ध्वजस्ताम्रमयः पताका गोपसन्निभा ॥५९

---

से सुसम्पन्न, अनेकों फेन की भाँति सौन्दर्यपूर्ण, पुष्पों तथा मालाओं से आच्छन्न एवं अनेक बाजों को बजाने वाले अनेक मनुष्यों की मूर्तियों से आवृत हो ।४६। हे यदुनन्दन ! इन्द्र का ध्वज दण्ड सुवर्ण का बनाये, उनकी अनेकों रंग की पताका हाथी के समीप स्थित करे ।४७। बुद्धिमानों ने लोहे का दण्ड होना यम के चिह्न में बताया है । उनकी काले रंग की पताका महिष के समीप

स्वर्णदण्डस्तु वीरस्य ध्वजो मेषसमन्वितः । पताका बहुरत्नाढ्ये[1] कर्तव्या यदुनन्दन ॥६०
अश्मसारमयो दण्डो ध्वजो वातस्य उच्यते । पताका कृष्णवर्णा तु हरिणस्य समीपगा ॥६१
भगवत्या ध्वजो दण्डः सर्वरत्नमयः स्मृतः । पताका तु त्रिवर्णा स्यात्सिंहस्याधोगता नृप ॥६२
एवंविधमिमं कृत्वा ध्वजं लक्षणलक्षितम् । अधिवास्य ततो राजंस्तत आरोपयेद् बुधः ॥६३
ततः सर्वौषधीभिश्च स्नापयित्वा प्रयत्नतः । समालभ्य च बध्नीयान्मध्ये प्रतिसरान्नृप ॥६४
कल्पयित्वा शुभां वेदिं कलशैरुपशोभिताम् । तस्यां वेद्यां समारोप्य तां रात्रिमधिवासयेत् ॥६५
नानाकुसुमचित्रां च स्रजं तस्यानुलम्बयेत् । समभ्यर्च्य प्रयत्नेन धूपमस्य निवेदयेत् ॥६६
बलिकर्म ततः कृत्वा कृशरापूपकादिभिः । पलालपूपिकाभिश्च दधिपायससूपकैः[2] ॥६७
उद्दिश्य लोकपालेभ्यो बलिं दद्याच्च वायसैः । ब्राह्मणान्स्वस्ति वाच्याथ कृत्वा पुण्याहमङ्गलम् ॥६८
वादित्रकृतनिर्घोषं जलं[3] संस्कारसंयुतम् । नानाबुद्बुदसंपन्नं वेष्टितं नववाससा ॥६९
शुभे लग्ने दिने ऋक्षे ध्वजं चारोपयेद् बुधः । विन्यस्य स्वर्णकलशं श्वभ्रराजं ध्वजस्य तु ॥७०
एवमारोपयेद्यस्तु ध्वजं देवालयोपरि । स श्रिया वर्धते नित्यं प्राप्नोति परमां गतिम् ॥७१
असुरा वासमिच्छन्ति ध्वजहीने सुरालये । तस्माद्देवालयं प्राज्ञो ध्वजहीनं न कारयेत् ॥७२

---

पताका बनाये ।५९। अग्नि का ध्वज दण्ड सुवर्ण निर्मित एवं मेष युक्त होना चाहिए, और हे यदुनन्दन ! अनेकों रत्नों या रंगों से सुशोभित उनकी पताका बनाये ।६०। वायु का ध्वजदण्ड लोहे का बताया गया है, उनकी काले रंग की पताका हरिण के समीप स्थापित होनी चाहिए ।६१। भगवती का ध्वजदण्ड समस्त रत्नों से निर्मित होना चाहिए, तथा हे नृप ! तीन रंग की उनकी पताका सिंह के नीचे स्थापित [illegible] लक्षणों से ध्वजाओं को विभूषित करके उसके पश्चात् राजन् !

मन्त्रश्च स्थापने प्रोक्तो विधानज्ञैर्ध्वजस्य तु । एह्येहि भगवन्देव देववाहन वै खग ॥७३
श्रीकरः श्रीनिवासश्च जय जैत्रोपशोभित । व्योमरूप महारूप धर्मात्मंस्त्वं च वै गतेः ॥७४
सान्निध्यं कुरु दण्डेऽस्मिन्साक्षी च ध्रुवतां व्रज । कुरु वृद्धिं सदा कर्तुः प्रासादस्यार्कवल्लभ ॥७५
ॐ एह्येहि भगवन्नीश्वरविनिर्मित उपरिचरवायुमार्गानुसारिञ्छ्रीनिवास रिपुध्वंस
यक्षनिलय सर्वदेवप्रियं कुरु सान्निध्यं शान्ति स्वस्त्ययनं च मेभयं सर्वविघ्ना व्यपसरन्तु ॥७६
मन्त्रेणानेन राजेन्द्र श्वभ्रे दण्डे निवेशयेत् । पताकां पूर्वमन्त्रेण स्थित्वा पूर्वमुखो नृप ॥७७
क्षिपेदूर्ध्वमशाकाशं प्रासादशिखराद्विभोः । यजमानस्ततः पश्येत्पताकां यदुनन्दन ॥७८
प्रासादपुरतोवापि पताकां पातयेद्यदि । इन्द्रलोकं तदा कर्ता विशेद्वै यदुनन्दन ॥७९
आग्नेय्यामग्निलोकं तु याम्यां यमसदो भजेत् । नैऋत्यां नैऋतं लोकं वारुण्यः वारुणं व्रजेत् ॥८०
यस्य देवस्य यद्वेश्म कृतं यदुकुलोद्वह । तस्य लोकमवाप्नोति वृषस्थानगतो यदि ॥८१
वायव्ये वायुमाप्नोति सौम्यायां सोममाप्नुयात् । ऐशान्यामीशमाप्नोति कर्ता वै देववेश्मनः ॥८२
य एवं कारयेद्भक्त्या ध्वजस्यारोपणं रवेः । स हि भुक्त्वा परान्भोगान्सूर्यलोके महीयते ॥८३

---

बुद्धिमान् को चाहिए कि देवालय कभी ध्वजा शून्य न हो ।७२। विधान के विद्वानों ने ध्वजा स्थापन के लिए यह मंत्र बताये हैं—हे भगवन्, हे देव, हे देववाहन, हे आकाश में गमन करने वाले ! आप श्री उत्पन्न करने वाले तथा श्री के निवास रूप हैं। हे जप एवं जैत्र से सुशोभित, हे व्योमरूप, हे महारूप, हे धर्मात्मन् ! तुम्हीं गति रूप हो ! इस दंड में साक्षी के रूप में प्रविष्ट होकर आप अटल हो जाइये । हे अर्कवल्लभ !

तेजसाम्बुजसंकाशः कान्त्या चाम्बुजसन्निभः । द्विजातितुल्यः प्रभया विक्रमेण च गोपतेः ॥८४

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने
ध्वजारोपणविधिवर्णनं नामाष्टत्रिंशदधिकशततमोऽध्यायः ।१३८।

# अथैकोनचत्वारिंशदधिकशततमोऽध्यायः

## भोजकानयनवर्णनम्

### साम्ब उवाच

त्वत्प्रसादान्मया प्राप्तं रूपमेतत्पुरातनम् । प्रत्यक्षदर्शनं चापि भास्करस्य महात्मनः ॥१
सर्वमेतत्तु सम्प्राप्य पुनश्चिन्ताकुलं मनः । देवस्य परिचर्यायाः पालनं कः करिष्यति ॥२
गुणयुक्तं द्विजं किञ्चित्समर्थं परिपालने । ममैवानुग्रहाद्ब्रह्मन्द्विजं व्याख्यातुमर्हसि ॥३
एवमुक्तस्तु साम्बेन नारदः प्रत्युवाच तम् । न द्विजाः परिगृह्णन्ति देवस्य स्वीकृतं धनम् ॥४
विद्यते हि धनं ह्यत्र गुणश्चायं प्रतिग्रहः । देवचर्यागतैर्द्रव्यैः क्रिया ब्राह्मी न विद्यते ॥५
अवज्ञया च कुर्वन्ति ये क्रियां लोभमोहिताः । अपाङ्क्तेया भवन्तीह ते वै देवलका द्विजाः ॥६
देवस्वं ब्राह्मणस्वं च यो लोभादुपजीवति । स पापात्मा नरो लोके गृध्रोच्छिष्टेन जीवति ॥

---

सूर्य के समान पराक्रम की प्राप्ति पूर्वक वह उत्तम भोगों का उपभोग करके सूर्य लोक में पूजित होता है।८३-८४

श्रीभविष्य महापुराण में ब्राह्मपर्व के सप्तमी कल्प के साम्बोपाख्यान में ध्वजारोपण विधि वर्णन

ततो न ब्राह्मणः कश्चिद्देवचर्यां करिष्यति ॥७
विधिज्ञं ज्ञानवन्तं च परिचर्याक्षमं तथा । देव एव तमाख्यातुं तस्मात्तं शरणं व्रज ॥८
अथवा यदुशार्दूल उग्रसेनपुरोहितम् । गत्वा[1] गौरमुखं पृच्छ स ते कामं विधास्यति ॥९
नारदेनैवमुक्तस्तु साम्बो जाम्बवतीसुतः । सुखासीनं गृहे वीर उग्रसेनपुरोहितम् ॥१०
कृतपूर्वाह्लिकं वीर विप्रं गौरमुखं नृप । विनयेनोपसङ्गम्य साम्बो वाक्यमथाब्रवीत् ॥११
मया भानोः प्रसादेन कारितं विपुलं गृहम् । सपत्नीकं ससैन्यं च पृथिव्यां सारवत्स्थितम् ॥१२
सर्वं तस्मिन्मया दत्तं कृतं मूर्तेश्च मण्डलम् । तस्मादिष्ट्वा विशिष्टेभ्यो देयं दानं मनोगतम् ॥१३
तत्सर्वं मम सम्प्रीत्या गृहाण त्वं महामुने । साम्बवाक्यमिदं श्रुत्वा प्रत्युवाच महामुनिः ॥१४

## गौरमुख उवाच

ब्रवीम्यहमशेषेण यथावदनुपूर्वशः । अहं विप्रो भवान्राजा स च देवपरिग्रहः ॥
अपरस्परमेवं तु ग्रहणं मे विरुध्यते ॥१५
ब्रह्मविद्याप्रणीतानि स्वकर्माणि द्विजातयः । कुर्वाणा न प्रहीयन्ते अन्यथा भिन्नवृत्तयः ॥१६
क्षान्तिरध्यापनं[2] जापः सत्यं च यदुनन्दन । एतानि विप्रकर्माणि न देवार्थपरिग्रहः[3] ॥१७

---

कोई ब्राह्मण देव-मंदिर की पूजा स्वीकार नहीं कर सकता है ।७। विधान का ज्ञाता, ज्ञानी, सेवा करने के योग्य, ऐसे पुरुष को सूर्य देव ही बना सकेंगे, अतः इसके लिए उन्हीं की शरण जाओ ।८। अथवा हे यदुशार्दूल ! उग्रसेन के पुरोहित गौरमुख से इस बात की चर्चा करो । तो तुम्हारा कार्य अवश्य कर देंगे ।९। हे वीर ! नारद के इस प्रकार कहने पर जाम्बवती पुत्र साम्ब घर में सुख पूर्वक बैठे हुए उग्रसेन पुरोहित के समीप पहुँचे ।१०। हे वीर ! हे नृप ! पूर्वाह्न काल के धार्मिक कृत्यों को समाप्त कर बैठे हुए

यदि देवार्थदानं[1] स्याततो देवलका द्विजाः । देवद्रव्याभिलाषश्च ब्राह्मण्यं तु विमुञ्चति ॥१८
देवद्वारे च यद्दानं ब्राह्मणाय प्रयच्छति । द्वावेतौ पापकर्तारावात्मदोषेण मानवौ ॥१९
देवार्थदानं[2] वार्ष्णेय यद्गृहीत्वा च यो द्विजः । श्राद्धे वा यदि वा सत्रे तज्जुहोति ददाति वा ॥
॥२०
भिन्न वृत्तो द्विजः पापो राक्षसः सोऽभिजायते
द्विजो देवलको यत्र पङ्क्त्यां भुङ्क्ते महीपते । अन्नान्युपस्पृशेन्नीचा सा पङ्क्तिः पापमाचरेत् ॥२१
द्विजो देवलको यस्य संस्कारं सम्प्रयच्छति । सोऽधोमुखान्पितृन्सर्वानाक्रम्य विनिपातयेत् ॥२२
आत्मानं पातयेद्यस्तु सोन्यानुद्धरते कथम् उद्धरिष्यति चात्मानमित्येषा कल्पनाधमा ॥२३
यो हठाच्च[3] भयाच्चैव कुरुते रविवेश्मनः । वृत्तिं विधत्ते विप्रत्वात्पतितस्स तु जायते ॥२४
सप्रतिग्रहमन्त्रेण द्विजोऽश्नाति परिग्रहम् । देवप्रतिग्रहार्थेषु वेदवाक्यं न विद्यते ॥२५
तस्माद्राजा न देवार्थं विप्रे दद्यात्कथञ्चन । ब्रह्मसूत्रमहं छित्त्वा गमिष्यामीति गम्यताम् ॥२६

## साम्ब उवाच

अग्राह्यं चेद्द्विजातिभ्यः कस्मै देयमिदं मया । श्रुतं वा दृष्टपूर्वं वा तन्मे व्याख्यातुमर्हसि ॥२७

## गौरमुख उवाच

मगाय सम्प्रयच्छ त्वं पुरमेतच्छुभं विभो । तस्याधिकारो देवान्ने देवतानां च पूजने ॥२८

---

के लिए दिये गये धन को स्वीकार करने वाले द्विजों को देवलक कहा जाता है । देव धन की अभिलाषा करने वाला ब्राह्मण ब्राह्मणत्व हीन हो जाता है ।१८। देव मन्दिर में ब्राह्मण के लिए जो दान देता है, ये दोनों देने लेने वाले मनुष्य अपने दोष के नाते पापी हो जाते हैं ।१९। हे वृष्णि कुलोत्पन्न ! जो ब्राह्मण देवधन को लेकर उससे श्राद्ध अथवा यज्ञ में हवन करता है या अन्य को देता है, वह अपने धर्म से भिन्न वृत्ति अपनाने वाला

### साम्ब उवाच

कोऽयं मगेति ते प्रोक्ताः क्व वासौ वसते विभो । कस्य पुत्रो द्विजश्रेष्ठ किमाचारः किमाकृतिः ॥२९

### गौरमुख उवाच

योऽयं मगेति वै प्रोक्तो मगो दिव्यो द्विजोत्तमः । निक्षुभायां[1] सुतो वीर आदित्यात्मज उच्यते ॥३०

### साम्ब उवाच

कथं स निक्षुभापुत्रः कथं वीरसुतस्तथा । कथं चादित्यतनयो मगोऽसावुच्यतेनऽघ ॥३१

### गौरमुख उवाच

मानुषत्वं गता देवी निक्षुभा किल यादव । गता शापमवाप्येह भास्कराल्लोकपूजिता ॥३२
गोत्रं मिहिरमित्याहुस्तस्मै ब्राह्मण्यमुत्तमम् । सुजिह्वा नाम धर्मात्मा ऋषिपुत्रः पुरानघ ॥३३
तस्यात्मजा समुत्पन्ना निक्षुभा सा वराङ्गना । रूपेणाप्रतिमा लोके हारलीला मता तु सा ॥३४
पितुर्नियोगात्सा कन्या विहरेज्जातवेदसि ॥३५
विहरन्ती यथान्यायं समिद्ध पावके तथा । अथ तां देवदेवेशो ह्यंशुमाली ददर्श ह ॥३६
रूपयौवनसम्पन्नां ततः कामवशं गतः । चिन्तयामास देवेशः कथं तां वै भजाम्यहम् ॥३७
अनयावहृतो योऽयं पावको देवपूजितः । वनमाविश्य तन्वङ्गीं भजेयं लोकपूजिताम् ॥३८

---

**साम्ब ने कहा**—हे विभो ! ये मग कौन हैं, कहाँ इनका निवास स्थान है, किसके पुत्र हैं, एवं हे द्विजश्रेष्ठ ! इनके आचार तथा आकृति कैसी होती है ।२९

**गौरमुख बोले**—जिस मग को मैंने

इति सञ्चिन्त्य देवेशः सहस्रांशुर्दिवस्पतिः । विवेश पावकं वीर तत्पुत्रश्चाभवत्तदा ।।३९
ततो विलासलावण्यरूपयौवनशालिनी । समिद्धं लङ्घयित्वाग्निं जगामायतलोचना ।।४०
क्रुद्धः स्वरूपमास्थाय दृष्ट्वा कन्यां स पीडितः । करं करेण सङ्गृह्य ततस्तां हव्यवाहनः ।।४१
उवाच यदुशार्दूल नोदितो भास्करेण तु । वेदोक्तं विधिमुत्सृज्य यथाहं लंघितस्त्वया ।।४२
तस्मान्मत्तः समुत्पन्नो न च पुत्रो भविष्यति । जरशब्द इति ख्यातो वंशकीर्तिविवर्धनः ।।४३
अग्निजात्या मगाः प्रोक्ताः सोमजात्या द्विजातयः । भोजकादित्यजात्या हि दिव्यास्ते परिकीर्तिताः ।।४४
तामेवमुक्त्वा भगवानादित्याऽन्तरतस्तदा । अथोत्पन्नां प्रजां ज्ञात्वा ध्यानयोगेन वै ऋषिः ।।४५
पतितः स्यान्महातेजा ऋग्जिह्वः सुमहामतिः । शापमुद्यम्य तेजस्वी ऋग्जिह्वो वाक्यमब्रवीत् ।।४६
आत्मापराधात्कामिन्या यथा गर्भो नलावृतः। सम्भूतस्ते महाभागे अपूज्योऽयं भविष्यति ।।४७
पुत्रशोकाभिसन्तप्ता बाला पर्याकुलेक्षणा । चिन्तयामास दुःखार्ता तमेकं ज्वलनाकृतिम् ।।४८
ततो देववरिष्ठस्य मम योनिसमुद्भवः । अयं दत्तो महाशापः पूज्यतां कर्तुमर्हसि ।।४९
भवेत्पूज्यो हि मे पुत्रो देवेश्वर तथा कुरु । एवं चिंतयमानस्तु भगवानर्यमा किल ।।५०
आग्नेयं रूपमाश्रित्य चेदं वचनमब्रवीत् । स्निग्धो गम्भीरनिर्घोषः शान्तो ज्वरविवर्जितः ।।५१

---

कर देवेश सहस्र किरण वाले सूर्य ने अग्नि में प्रवेश किया । और इसी लिए उससे पुत्र उत्पन्न हुआ ।३९। एकबार उस विलास सुन्दरी एवं विशाल नेत्रवाली रूप यौवन के मद से मत्त होकर प्रज्वलित अग्नि को लाँघकर चली गई ।४०। उस समय कामपीड़ित अग्नि प्रविष्ट सूर्य ने क्रुद्ध होकर अपने हाथ से उसका हांथ पकड़ कर कहा । हे यदुशार्दूल ! उस समय भास्कर उदय नहीं हुए थे । उन्होंने कहा वेद विधान का [illegible] मेरे द्वारा उत्पन्न होने पर भी पुत्र न

ऋग्जिह्वः समुहातेजा धर्मं चरति सुव्रत । तेनोत्सृष्टं महाशापं नान्यथा कर्तुमुत्सहे ॥५२
किं तु कार्यगरीयस्त्वादात्मनो योग्यमुत्तमम् । तव पुत्रं विधास्यामि चापूज्यं वेदपारगम् ॥५३
वंशश्च सुमहांस्तस्य निवसिष्यति भूतले । ममाङ्गानि महात्मानो वाशिष्ठा ब्रह्मवादिनः ॥५४
मद्गायना मद्यजना मद्भक्ता मत्परायणाः । मम शुश्रूषकाश्चैव मम च व्रतचारिणः ॥५५
त्वां च मां च यथान्यायं वेदं तत्त्वार्थदर्शिनः । पूजयिष्यन्ति निरताः सदा मद्भावभाविताः ॥५६
मत्कर्मणां मदङ्गानां मद्भावविनिवेशनात् । विरजा मत्प्रसादेन मामेवैष्यन्त्यसंशयम् ॥५७
जटाश्मश्रुधरा नित्यं सदा मयि परायणाः । पञ्चकालविधानज्ञा वीरकालस्य यज्विनः ॥५८
पूर्णकदक्षिणे पाणौ वर्म वामेन धारयन् । पतिदानेन वदनं प्रच्छाद्य नियतः शुचिः ॥५९
प्राणं हि महतां कृत्वा ततो भुञ्जीत वाग्यतः । अयमाच्चाप्रसादाच्च व्याकुलेन्द्रियचेतसा ॥६०
विधिहीनं मंत्रहीनं ये वै यक्ष्यन्ति मामतः । तेऽपि स्वर्गाच्च्युताः क्लान्ता रमन्ते सूर्यसन्निधौ ॥६१
एवंविधास्तव सुता भविष्यन्ति महीतले । मगवंशे महात्मानो वेदवेदाङ्गपारगाः ॥६२
एवमाश्वास्य तां देवीं भास्करो वारितस्करः । अन्तदर्धे महातेजाः सा च हर्षमवाप ह ॥६३
एवमेते समुत्पन्ना भोजकाः कृष्णनन्दन । विष्णुभास्ते तथादित्या उत्पन्ना लोकपूजिताः ॥६४
तेषामेतत्पुरं देहि पर्याप्तास्ते प्रतिग्रहे । त्वदीयस्यास्य मे वीर तथा भास्करपूजने ॥६५

---

ऋग्जिह्व धर्म का आचरण कर रहे हैं, अतः उनके द्वारा दिये गये उस महाशाप की प्रतिक्रिया मैं करने में असमर्थ हूँ ।५०-५२। परन्तु उत्तम कार्य करने के नाते मैं तुम्हारे अयोग्य पुत्रों को उत्तम, योग्य, एवं वेद का पारगामी विद्वान् बनाऊँगा ।५३। इस भूतल पर उनकी महान वंश परम्परा निवास करेगी । वे सब मेरे अंग, महात्मा, वशिष्ठगोत्री, ब्रह्मवादी, मेरे ही

तस्य गौरमुखस्येदं वाक्यं श्रुत्वा स यादवः । साम्बो जाम्बवतीपुत्रः प्रणम्य शिरसोक्तवान् ।।६६
क्व वसन्ते महात्मान एते भास्करपुत्रकाः । भोजका द्विजशार्दूल येन तानानयाम्यहम् ।।६७

## गौरमुख उवाच

नाहं जाने महाबाहो वसन्ते यत्र वै मगाः । जानीते तान्रविर्वीर तस्मात्तं शरणं व्रज ।।६८
ब्राह्मणेनैवमुक्तस्तु प्रणम्य शिरसा रविम् । जगाद भास्करं साम्बः कस्ते पूजां करिष्यति ।।६९
विज्ञप्तस्त्वेव साम्बेन प्रतिमा तमुवाच ह । न योग्याः परिचर्यायां जम्बूद्वीपे ममानघ ।।७०
मम पूजाकरं गत्वा शाकद्वीपादिहानय । लवणोदात्परे पारे क्षीरोदेन समावृतः ।।७१
जम्बूद्वीपात्परो यस्माच्छाकद्वीप इति स्मृतः । तत्र पुण्या जनपदाश्चतुर्वर्णसमन्विताः ।।७२
मगाश्च मगगाश्चैव गानगा[1] मन्दगास्तथा । मगा ब्राह्मणभूयिष्ठा मगगाः क्षत्रियाः स्मृताः ।।७३
वैश्यास्तु गानगा ज्ञेयाः शूद्रास्तेषां तु मन्दगाः । न तेषां सङ्करः कश्चिद्धर्माश्रयकृते क्वचित् ।।७४
धर्मस्यास्य विचारो वा ह्येकतः सुखिनः प्रजाः । तेजसस्ते मदीयस्य निर्मिता विश्वकर्मणा ।। ।।७५
तेभ्यो वेदास्तु चत्वारः सरहस्या मयोदिताः । वेदोक्तैर्विविधैः स्तोत्रैः परैर्गुह्यैर्मया कृतैः ।।७६
ते च ध्यायन्ति मामेव यजन्ते मां च नित्यशः । मन्मानसा मद्यजना मद्भक्ता मत्परायणाः ।।७७
मम शुश्रूषकाश्चैव मम च व्रतचारिणः । अव्यङ्गधारिणश्चैव विधिदृष्टेन कर्मणा ।।७८

---

उन्हें पुनः शिर से प्रणाम कर कहा—हे द्विजोत्तम ! ये भास्कर के पुत्र महात्मा भोजक लोग कहाँ रहते हैं, (आप बतायें) जिससे मैं उन्हें यहाँ ला सकूँ ।६६-६७

**गौरमुख बोले**—हे महाबाहो ! वे मग जहाँ रहते हैं, मुझे मालूम नहीं है । हे वीर ! सूर्य ही इसे

कुर्वन्ति ते सदा भद्रां मम पूजां ममानुगाः । तथा देवाः सगन्धर्वाः सिद्धाश्च सह चारणैः ॥
विहरन्ते रमन्ते च दृश्यमानाश्च तैः सह ॥७९
जम्बूद्वीपे त्वहं विष्णुर्वेदवेदाङ्गपूजितः । शक्रोऽहं शाल्मलीद्वीपे क्रौञ्चद्वीपे ह्यहं भगः[1] ॥८०
प्लक्षद्वीपे त्वहं भानुः शाकद्वीपे दिवाकरः । पुष्करे च स्मृतो ब्रह्मा ततश्चाहं महेश्वरः ॥८१
तान्मगान्मम पूजार्थं शाकद्वीपादिहानय । आरुह्य गरुडं साम्ब शीघ्रं गत्वाविचारयन् ॥८२
तथेति गृह्य तामाज्ञां रवेर्जाम्बवतीसुतः । पुनर्द्वारवतीं गत्वा कान्त्यातीव समन्वितः ॥८३
आख्यातवान्पितुः सर्वं स्वकीयं देवदर्शनम् । तस्माच्च गरुडं लब्ध्वा ययौ साम्बोऽधिरुह्य तम् ॥८४
शाकद्वीपमनुप्राप्य सम्प्रहृष्टतनूरुहः । तत्रापश्यद्यथोद्दिष्टान्साम्बस्तेजस्विनो मगान् ॥८५
विवस्वन्तं पूजयन्तो धूपदीपादिभिः शुभैः । सोऽभिवाद्य च तान्पूर्वं कृत्वाप्येषां प्रदक्षिणाम् ॥८६
पृष्ट्वा चानामयं तेषां प्रशंसासामपूर्वकम् । यूयं हि पुण्यकर्माणो द्रष्टव्यार्थे शुभार्थिनः ॥
रता येऽर्कस्य पूजायां येषां चैव वरप्रदः ॥८७
तनयं वित्त मां विष्णोः साम्बं नाम्ना च विश्रुतम् । चन्द्रभागातटे चापि मया सूर्यो निवेशितः ॥८८
तेनाहं प्रेषितश्चात्र उत्तिष्ठध्वं व्रजामहे । ते तमूचुस्ततः साम्बमेवमेतन्न संशयः ॥८९
अस्माकमपि देवेन व्याख्यातां पूर्वमेव हि । अष्टादश कुलानीह मगानां वेदवादिनाम् ॥

---

हैं ।७७-७८। वे मेरे अनुयायी होकर सदैव मेरी उत्तम पूजा करते हैं, तथा देव, गन्धर्व, सिद्ध एवं चारणों के साथ विहार, रमण सभी कुछ करते हुए देखे जाते हैं ।७९। जम्बू द्वीप में मैं वेद एवं वेदाङ्ग द्वारा पूजित विष्णु, शाल्मली द्वीप में शक्र (इन्द्र) क्रौंच द्वीप में शिव, लक्षद्वीप में भानु, शाकद्वीप में दिवाकर, पुष्कर में ब्रह्मा, एवं (कुशद्वीप) में महेश्वर के रूप में स्थित हूँ ।८०-८१। अतः मेरी पूजा के लिए उन मगों को

यास्यन्ति ये त्वया सार्धं यथा देवेन भाषितम् ॥९०
ततस्तानि दशाष्टौ च कुलानीह समन्ततः । आरोप्य गरुडे साम्बस्त्वरितः पुनरभ्यगात् ॥९१
सोऽल्पेनैव तु कालेन प्राप्तो मित्रवनं ततः । कृत्वाज्ञां तु रवेः साम्बः कृत्स्नं त्वेवं न्यवेदयत् ॥९२
रविः शोभनमित्युक्त्वा प्रसन्नः साम्बमब्रवीत् । मम पूजाकरा ह्येते प्रजानां शान्तिकारकाः ॥९३
मम पूजां करिष्यन्ति विधानोक्तां यदूत्तम । तत्कृते न पुनश्चिन्ता तव काचिद्भविष्यति ॥९४

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने भोजकानयनं नामैकोनचत्वारिंदधिकशततमोऽध्यायः ।१३९।

# अथ चत्वारिंशदधिकशततमोऽध्यायः

## भोजकोत्पत्तिवर्णनम्

### सुमन्तुरुवाच

एवं स आनयित्वा तु मगान्साम्बो महीपते । स महात्मा पुरा साम्बश्चन्द्रभागासरित्तटे ॥१
पुरं निवेशयामास स्थापयित्वा दिवाकरम् ।कृत्वा धनसमृद्धं तु भोजकानां समर्पयत् ॥२
तत्पुरं सवितुः पुण्यं त्रिषु लोकेषु विश्रुतम् । सांबेन कारितं यस्मात्तस्मात्साम्बपुरं स्मृतम् ॥३
तस्मिन्प्रतिष्ठितो देवः पुरमध्ये दिवाकरः । सत्कृत्य स्थापिताः सर्वे आत्मनामाङ्किते पुरे ॥४

---

जो अठारह कुल हैं, वे सभी तुम्हारे साथ प्रस्थान करेंगे ।९०। उसके पश्चात् साम्ब उनके अठारहों कुलों
... ।९१। थोड़े ही समय में वह सूर्य की आज्ञा का पालन

मगानां तु सदाचारो दृष्टाचारकुलोचितः । देवशुश्रूषणं गीतं वेदप्रोक्तेन कर्मणा ।।५
कृतकृत्यस्तदा साम्बो वरं लब्ध्वा पुनर्युवा । आदिदेवं सुरज्येष्ठमादित्यं प्रणिपत्य सः ।।६
अनन्तरं मगान्सर्वान्प्रणिपत्याभिवाद्य च । प्रस्थितो निर्मलः साम्बः पुरीं द्वारवतीं तदा ।।७
मगानां कारणार्थेन प्रार्थिता भोजवंशजाः । वसुदेवस्य पौत्रेण गोत्रजेन महात्मना ।।८
कन्यादानं कृतं तेषां मगानां भोजकोत्तमैः । सर्वास्ताः सहिताः कन्याः प्रवालमणिभूषिताः ।।९
अर्चयित्वा तु ताःसर्वाः प्रेषिताः सवितुर्गृहम् । पुनर्गत्वा तु सांबेन पृष्टो देवो दिवाकरः ।।१०
मगानां ज्ञानमाख्याहि[1] वेदानव्यङ्गमेव च । साम्बस्य वचनं श्रुत्वा भास्करो वाक्यमब्रवीत् ।।११
पृच्छ त्वं नारदं गत्वा स ते सर्वं वदिष्यति । एवमुक्तोऽथ वै साम्बो गतवान्नारदं प्रति ।।१२
गत्वा कृत्स्नमिदं सर्वं तस्मै तेन निवेदितम् । स चाप्याह ततः साम्बं न जाने ज्ञानमुत्तमम् ।।१३
भोजकानां यदुश्रेष्ठ ज्ञानं व्यासो महामुनिः । तं गत्वा परिपृच्छ त्वं प्रणम्य शिरसा मुनिम् ।।१४
कृष्णानुरोधात्ते सर्वं स वक्ष्यति न संशयः । नारदेनैवमुक्तस्तु साम्बो जाम्बवतीसुतः ।।१५
व्यासाश्रमं स गत्वा तु प्रणम्य शिरसा मुनिम् । कृताञ्जलिपुटो भूत्वा इदं वचनमब्रवीत् ।।१६
शाकद्वीपं मया गत्वा आनीता मगपुङ्गवाः । बाला यौवनसम्पन्नाः सन्निविष्टा मगोत्तमाः ।।१७
सत्कृत्य पूजयित्वा तु पुरं तेषां समर्पितम् । सम्प्राप्य तु पुरं ते वै ज्येष्ठमध्यकनीयसः ।।१८
भोजवंशसमुत्पन्नाः कन्यकाः समलङ्कृताः । वरयित्वा कृतं तेषां विप्रप्रणयनं शुभम् ।।१९

---

वेद-विधान पूर्वक उनके द्वारा की गई सूर्य की परिचर्या को देखकर साम्ब कृतकृत्य हो गया । पुनः अपने युवा होने का वरदान प्राप्त करके वह साम्ब देव श्रेष्ठ, एवं देवों के आदि सूर्य को प्रणाम एवं सभी मगों को नम्रतापूर्वक अभिवादन किया और विशुद्ध होकर पुनः द्वारका पुरी को लौट आया ।५-७। वसुदेव के पौत्र (नाती) उस महात्मा साम्ब ने मगों के

अहो सभाग्याः श्लाघ्याश्च कृतपुण्याश्च ते सदा । पूजायां ये रता भानोर्येषां चैव वरप्रदः ॥२०
पर्याप्तं सर्वमेतेषामिह चामुष्मिकं फलम् । अनित्ये सति मानुष्ये देवपूजारता हि ये ॥२१
किन्तु चिन्तयतः सूर्यं चिन्तयित्वा तु भोजकान् । ज्ञानं प्रति तथा चैषां हृदये संशयो मम ॥२२
कथं पूजाकरा ह्येते के मगाः के च भोजकाः । ज्ञानं किं परमं तेषां ज्ञेयस्तेषां क एव तु ॥२३
दिव्येति ते कथं प्रोक्ताः किमर्थं कूर्चधारणम् । सौरव्रतं किमर्थं तु वाचकास्ते कथं स्मृताः ॥२४
किमर्थं तेजसा वेदान्गायन्तश्चैव ते कथम् । अथाहिकञ्चुकस्याङ्गं किं प्रमाणं च कस्य वै ॥२५
कस्य वै का समाख्याता यदुत्पन्नं कथं स्मृतम् । कथं देवांश्च गायन्ति यज्ञं कुर्वन्ति ते कथम् ॥२६
अग्निहोत्रं च किं तेषां पञ्च दोलाश्च काः स्मृताः । एतत्सर्वंसमाख्याहि भोजकानां विचेष्टितम् ॥२७
साम्बस्य वचनं श्रुत्वा कृष्णद्वैपायनो मुनिः । कालीसुतो महातेजा उवाच परमं वचः ॥२८
साधुसाधु यदुश्रेष्ठ साधु पृष्टोऽस्मि सुव्रत । दुर्ज्ञेयचेष्टितं किञ्चिद्भोजकानां न संशयः ॥२९
भास्करस्य प्रसादेन ममापि स्मृतिमागतम् । यथाख्यातं वशिष्ठेन तथा ते वच्मि कृत्स्नशः ॥३०
मगानां चरितं श्रेष्ठं शृणु त्वं कृष्णनन्दन । ज्ञानवेदिन एवैते कर्मयोगं समाश्रिताः ॥३१
श्रूयन्ते ऋषयः सर्वे मौनेन नियमस्थिताः । भुञ्जते चापि मौनेन सर्वे वै परमर्षयः ॥३२
मुनिचर्याकृतस्तेऽपि शाकद्वीपनिवासिनः । तस्मान्मौनेन भोक्तव्यमगुणत्वमनिच्छता ॥३३

---

पूजा में मग्न रहने के नाते वे सदैव भाग्यवान्, श्लाघ्य एवं पुण्यकर्मा हैं क्योंकि जिनके लिए सूर्य सभी प्रकार से वरदायक रहते हैं ।२०। मनुष्य के शरीर आदि सभी अनित्य (नाशवान) हैं, ऐसा समझ कर ये लोग सदैव सूर्य देव की आराधना करते हैं । इसीलिए इन्हें लोक परलोक के पर्याप्त उत्तम फल प्राप्त

वचः सूर्यसमाख्यातं कारणं च वरं तथा । अर्चायां ते च ते नित्यमर्चयन्तश्च ते स्मृताः ॥३४
भोजकन्यासुजातत्वाद्भोजकास्तेन ते स्मृताः । ब्राह्मणानां यथा प्रोक्तो वेदाश्चत्वार एव तु ॥३५
ऋग्वेदोऽथ यजुर्वेदः सामवेदस्त्वथर्वणः । ब्रह्मणोक्तास्तथा वेदा मगानामपि सुव्रत ॥३६
त एव विपरीतास्तु तेषां वेदाः प्रकीर्तिताः । वेदो विश्वमदश्चैव विद्वद्वह्निरसस्तथा ॥३७
वेदा ह्येते मगानां तु पुरोवाच प्रजापतिः । मगा वेदमधीयन्ते वेदाङ्गास्तेन ते स्मृताः ॥३८
शेषो न हि महाभागः सर्वसत्त्वसुखावहः । ससूर्यरथमासाद्य रथिभिः सह वर्षति ॥३९
यस्तस्य तु पुनर्मोकं स रवेर्हि महानकः । वन्दितव्यो मगानां तु अस्त्रमन्त्रेण नित्यशः ॥४०
यथा स्रजो द्विजानां तु पूजाकाले प्रमीयते । सर्वसंस्कारयज्ञेषु यथा दर्भा द्विजातिषु ॥४१
पवित्राः कीर्तितास्तेषां तथा धर्मो मगस्य तु । एभिर्जयन्ति भूयिष्ठं तस्मिन्द्वीपे मगाधिपाः ॥४२
विद्यावन्तः कुलश्रेष्ठाः शौचाचारसमन्विताः । यज्ञावसक्ता[1] भक्ताश्च जपन्तो मन्त्रमादितः ॥४३
प्रियास्तु यदुशार्दूल भोजका यदुनन्दन । अस्त्रमिव वै मन्त्रो वेदस्य परिपठ्यते ॥४४
सर्वेषां ब्राह्मणानां तु सावित्री परिकल्प्यते । अस्माकं तु यदुश्रेष्ठ महाव्याहृतिपूर्तिका ॥४५

अमोहकेनाथ विमाभुञ्जी मौनेन चैवापि यथा हि युक्तम् ।
न चापि किञ्चित्स्मृतिकं स्पृशेच्च तच्चापि नात्रैव च संस्पृशेद्धि ॥४६

---

गुणहीन नियम का पालन नहीं करते हैं ।३३। सूर्य की बतायी हुई बातें एवं वरदान ग्रहण किये हैं, इनके मूलकारण सूर्य हैं, ये सूर्य की ही नित्य पूजा करते हैं अतः इन्हें पूजक (देवलक) कहा जाता है ।३४। भोजक की कन्या में उत्पन्न होने के नाते ये भोजक कहे जाते हैं । ब्राह्मणों के लिए जिस प्रकार चारों वेदों (ऋग्यजु साम और अथर्व) की व्याख्या की गई है, उसी प्रकार हे सुव्रत ! ...

श्वसन्त्यनिच्छंस्तु परिक्षिपेत्तु स्वाभीष्टसूर्यं तु नमेत्सदैव।
यथा यज्ञं हि मन्त्रेण वेदप्रोक्तेन कर्मणा ॥४७
तत्त्वमन्यन्मगानान्तु विधिमन्त्रपुरस्कृतम् । हविः सम्पद्यते यस्मात्तेन ते यज्विनः स्मृताः ॥४८
यथाग्निहोत्रं प्रथितं द्विजानां तथाध्वहोत्रं विहितं मगानाम्।
अच्छं च नामेति तदध्वरस्य मुनेर्वचो नात्र विचारणास्ति ॥४९
पञ्चधूपाः प्रदातव्याः सिद्धिरस्येह सर्वदा । दण्डनायकवेले द्वे त्रिसन्ध्यं भास्करस्य तु ॥५०
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने भोजकोत्पत्तिवर्णनं
नाम चत्वारिंशदधिकशततमोऽध्यायः ।१४०।

# अथैकचत्वारिंशदधिकशततमोऽध्यायः

## भोजकजातिवर्णनम्

### साम्ब उवाच

भोजकानां यत्त्वयोक्तमभ्यङ्गो देहशोधकः । व्रतबन्धस्त्वसौ प्रोक्तस्तेषां जातिश्च का स्मृता ॥१

### व्यास उवाच

ते पृष्टा भवता सर्वे भोजकानां कुमारकाः । किमाख्यातं ततस्तैस्तु तदेवाचक्ष्व कृत्स्नशः ॥२

---

प्रकार श्वास अनिच्छा पूर्वक भीतर बाहर आती जाती रहती है, उसी भाँति नित्य निरन्तर अपने इष्ट देव
सूर्य का सदैव नमस्कार करते रहें । वेदोक्त विधान एवं मंत्र पूर्वक जिस प्रकार यज्ञ सुसम्पन्न किया जाता

## साम्ब उवाच

सन्निवेषा मया प्रोक्ता भोजकानां समन्ततः । ममैव ब्रूत तत्त्वं तद्वर्णः कोऽत्र कथं स्थितः ॥३
ततस्तु भगवान्प्राह वाक्यं वाक्यविशारदः । ये त्वयोक्ताः श्रुताः साम्ब भोजकानां कुमारकाः ॥४
ममैवैते मगा ज्ञेया अष्टौ शूद्रा मदङ्गजाः । एतद्बुद्ध्वा तु वचनं प्रणम्य शिरसा रविम् ॥५
दत्ता भोजकुलोत्पन्ना दशभ्यो दशकन्यकाः । ततस्तु मन्दकेभ्योऽपि दत्ताश्चाष्टौ हि कन्यकाः ॥६
ततो निवेशितं तेषां मया साम्ब पुरं स्मर । दासकन्यास्तु याश्चाष्टौ भोजकन्याश्च या दश ॥७
एतास्तेषां कुमाराणां ज्ञेयास्ता दश चाष्ट च । तत्र ते भोजकन्यासु द्विजैरुत्पादिताः सुताः ॥८
भोजकास्तान्गणान्प्राहुर्ब्राह्मणान्दिव्यसंज्ञितान् । दासकन्यासु ये जाता मन्दगैरन्त्यसंज्ञितैः ॥९
मदङ्गा नाम ते ज्ञेयाः सवितुः परिचारकाः । ते च विप्रपुरे तस्मिन्पुत्रदारशुभैर्वृताः ॥१०
स्वधर्मैर्यष्टुमारब्धैः शाकद्वीपेऽर्चितो रविः । नानाविधैर्वैदिकैस्तु मन्त्रैर्मुनिवरोत्तमाः ॥११
अव्यङ्गधारिणो मर्त्याः पूजयन्ते दिवस्पतिम् । दृष्ट्वा व्यङ्गं तु वै तेषां कौतूहलसमन्वितः ॥१२
साम्बः प्राह नमस्कृत्य भूयः सत्यवतीसुतम् । कथं वरोऽयमव्यङ्गः कथितो मुनिसत्तम ॥१३
कुत एष समुत्पन्नः कस्माच्च स शुचिः स्मृतः । बन्धनीयः कदा चायं किमर्थं चैव धार्यते ॥
किं प्रमाणं च भगवन्व्यङ्गश्चायं किमुच्यते ॥१४

---

**साम्ब ने कहा**—वहाँ भोजक कुमारों को प्रविष्ट कर उनसे मैंने कहा—मुझे बताइये कि किसकी कौन जाति एवं कहाँ स्थिति है ।३। उसके पश्चात् वाक्य निपुण भगवान् सूर्य बोले ! हे साम्ब ! जिन भोजक कुमारों को तुमने बताया है, उनमें मेरे अंग के दश भाग और आठ मेरे ही अंग से उत्पन्न शूद्र हैं ।

### सुमन्तुरुवाच

श्रुत्वैवं वचनं व्यासो जाम्बवत्याः सुतस्य च ।।१५
उवाच कुरुशार्दूल साम्बं कालीसुतः स तु ।।

### व्यास उवाच

एतच्च मे यथोक्तस्त्वं जातिरेषां न संशयः ।।१६
अव्यङ्गस्यापि ते वच्मि लक्षणं गदतः शृणु ।।१७

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने भोजकजातिवर्णनं नामैकचत्वारिंशदधिकशततमोऽध्यायः ।१४१।

# अथ द्विचत्वारिंशदधिकशततमोऽध्यायः

## व्यङ्गोत्पत्तिनामवर्णनम्

### व्यास उवाच

देवता ऋषयो नागा गन्धर्वाप्सरसां गणाः । यक्षरक्षांसि वै भानौ निवसन्ति ऋतुक्रमात् ।।१
तत्र तु वासुकिर्ह्यब्दमुद्यत्सूर्यरथं जवात् । स्वस्थानमाजगामाशु नमस्कृत्य दिवाकरम् ।।२
अव्यङ्गमेव सूर्याय प्रीत्यर्थं वै समर्पयत् । गाङ्गेयभूषितं दिव्यं नातिरक्तसितं शुभम् ।।३
बबन्ध तं च तत्प्रीत्यै मध्यभागे तमात्मनः । नागराजाङ्गसम्भूतो धृतो यस्माच्च भानुना ।।४

---

सुमन्तु बोले—जाम्बवती पुत्र (साम्ब) की ऐसी बातें सुनकर काली सुत व्यास ने उससे कहा ।

तत्तस्माद्धार्यते सूर्यप्रीत्यै तद्भक्तिमिच्छता । विधानेन च तत्त्वेन शुचिर्भवति भोजकः ।।५
नित्यं च धारणात्तस्य भवेत्प्रीतो दिवाकरः । न धारयन्ति ये त्वेवं भोजकाः पूजकाः रवेः ।।६
सौरहीना न ते याज्या उच्छिष्टा नात्र संशयः । स्मृत्याचारे ते हि भग्ना रविं नार्हन्ति पूजितुम् ।।७
पूजयन्तो रविं ते हि नरकं यान्ति रौरवम् । न वै हसेन्न उत्तिष्ठेद्यावदर्चां लभन्ति ते ।।८
इत्थं ज्ञात्वा न सन्देहो ह्यव्यङ्गेन विना रविः । नागराजस्य संस्पृष्टो ह्यारसुस्तेन संस्मृतः ।।९
एकवर्णः स कर्तव्यः कार्यसिद्धिकरस्तथा । प्रमाणेनाङ्गुलानां तु शताद्धि शतमुत्तरम् ।।१०
उत्कृष्टोऽयं प्रमाणेन मध्यमो विंशदुत्तरः । शतमष्टोत्तरं ह्रस्वो न तु ह्रस्वतरस्ततः ।।११
तदाकृतिः कृतश्चैष निर्मितो विश्वकर्मणा । मध्यमे भोजकानां तु परः शत उदाहृतः ।।१२
संस्कृतोऽपि विना तेन शुचिर्नैव भवत्युत । तेनास्य धारणाद्वीर शुचिरेव तदा भवेत् ।।१३
हविर्होमादिकाः सर्वा भवन्त्यस्य क्रियाः शुभाः । अव्यङ्गः पतिताङ्गश्च अव्यङ्गोऽथ महीपते ।।१४
एष सारश्च सा रम्या वै ज्ञेया जयनामभिः । अहेरङ्गात्समुत्पन्नो ह्यव्यङ्गस्तु ततः स्मृतः ।।१५
यस्मादस्मादहेरङ्गमव्यङ्गस्तेन चोच्यते । अर्हेति पूजायां धातोः प्रत्ययो ण्वुल्ततः स्मृतः ।।१६
पूजितश्च पवित्रश्च यस्मात्तेनार्हकः स्मृतः । सारसार्तः स्मृतं रूपं प्रधानं सार उच्यते ।।१७

---

सूर्य की प्रसन्नता के लिए धारण करते हैं। विधान पूर्वक उसे धारण करने से भोजक पवित्र होते हैं ।२-५। एवं उसे नित्य धारण करने से सूर्य भी प्रसन्न होते हैं । सूर्य की पूजा करने वाला भोजक विधान पूर्वक उसे धारण नहीं करता है, तो वह आदित्य भक्ति एवं उनके सभी कार्यों से वंचित होता है, तथा उच्छिष्ट होने के नाते पूजा के योग्य नहीं रहता है । वह सदाचार से भ्रष्ट हो जाता हैं अतः सूर्य की पूजा नहीं कर सकता है ।६-७। यदि वह सूर्य का पूजन करता ही है, तो उसे रौरव नामक नरक की प्राप्ति

षण भक्तौ स्मृतौ धातुस्तस्मात्सारसनः स्मृतः । यस्मादर्चितमेवं तु सुवर्णमणिमौक्तिकैः ॥१८
स ज्ञेयः पतिताङ्गस्तु नित्ययज्ञैरुपाहृतः । इत्येते कथिता वीर अव्यङ्गा व्यङ्गभोजकाः ॥१९
ऋद्धिवृद्धिकरो नित्यं कायशुद्धिकरस्तथा । सर्ववेदमयश्चायं सर्वदेवमयस्तथा ॥२०
सर्वभूतमयः साम्ब सर्वलोकमयस्तथा । मध्येऽस्य संस्थितो ब्रह्मा मूले विष्णुर्महामते ॥२१
शशाङ्कमौलिरन्त्ये तु संस्थितो यदुनंदन । ऋग्वेदोऽस्य स्थितो मूले यजुर्वेदोऽस्य मध्यगः ॥२२
अग्रे स्थितः सामवेदो ग्रन्थिराङ्गिरसोनघ । पृथ्वी मूलमाश्रित्य स्थिता च यदुसत्तम ॥२३
मूलाशनास्त्वपः साम्ब मध्ये देवो विभावसुः । तासामनन्तरं वात आकाशोऽग्रे समास्थितः ॥२४
मूले स्थितस्तु भूर्लोको भुवर्लोकस्तु मध्यगः । स्वर्लोकश्चाग्रमाश्रित्य स्थितो व्यङ्गस्य यावता ॥२५
एवं देवमयः सांब एवं लोकमयस्तथा । धारणीयो महान्भक्त्या पूजकैः प्रीतये रवेः ॥२६
पूजयन्ति रविं ये वै विनानेन यदूत्तम । पूजाफलं न तेषां स्यान्नरकं च व्रजन्ति हि ॥२७
तथा तेषां भवेन्नित्यमव्यङ्गो भोजकः सदा । अन्यकाले यदुश्रेष्ठ इत्येतत्कथितं तव ॥२८
बन्धने कारणं वीर भूषणानि च सुव्रत ॥२९

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने व्यङ्गोत्पत्तिर्नाम द्विचत्वारिंशदधिकशततमोऽध्यायः ।१४२।

---

भक्ति अर्थ में प्रयुक्त षण धातु से सारसन (सार) शब्द की निष्पत्ति होती है । सुवर्ण, मणि, एवं मोतियों द्वारा पूजित (विभूषित) और नित्य यज्ञों द्वारा अपनाने के नाते उसे पतिताङ्ग कहा जाता है । हे वीर ! व्यंग (उससे शून्य) भोजकों के लिए यही अव्यंग बताया गया है ।१८-१९। यह ऋद्धि, वृद्धि एवं शरीर शुद्धि करने वाला, सर्व वेदमय तथा सर्वदेवमय हैं ।२०। और हे साम्ब ! इसे सर्वभूतमय एवं सर्वलोक भी

# अथ त्रिचत्वारिंशदधिकशततमोऽध्यायः

## धूपादिविविधविधिवर्णनम्

### सुमन्तुरुवाच

श्रुत्वैवमेव साम्बेन व्यासात्सत्यवतीसुतात् । अभ्यङ्गस्य च उत्पत्तिं पुनरागान्महामतिः ॥१
अथागत्य महातेजाः साम्बो गत्वाश्रमं पुनः ॥२
नारदस्य महाबाहोर्नारदं वाक्यमब्रवीत् । कथमुत्क्षिप्य वै धूपं भोजकैः सवितुर्मुने ॥३
स्नानमाचमनं चैवमर्घ्यदानं महात्मने । साम्बस्य वचनं श्रुत्वा नारदो मुनिसत्तमः ॥४
उवाच कुरुशार्दूल साम्बं जाम्बवतीसुतम् । हन्त ते कथयिष्यामि रवेर्धूपविधिक्रमम् ॥५
स्नानमाचमनं चैव स्वर्णदानं तथैव च । आचान्तस्त्रिस्ततः स्नात्वा वाससी निर्मले शुभे ॥६
अनार्द्रे संवसीतैव पवित्रे परिधाय च । उदङ्मुखः प्राङ्मुखो वाप्याचामेच्च प्रयत्नतः ॥७
जले जलस्थो नाचामेज्जलादुत्तीर्य यत्नतः । अप्सु[1] सूर्यस्तथाग्निश्च माता देवी सरस्वती ॥८
तस्मादुत्तीर्य चाचामेन्नाचामेत्तु जलाशये । उपविश्य शुचौ देशे प्रयतः प्रागुदङ्मुखः ॥९
पादौ प्रक्षाल्य हस्तौ च अन्तर्जानुस्तथाचमेत् । प्रसन्नास्त्रिः पिबेत्त्वापः प्रयतः सुसमाहितः ॥१०
सम्मार्जनं तु द्विः कुर्यात्त्रिभिरभ्युक्षणं पुनः । मूर्धानं खानि चात्मानमुपस्पृश्यानु पूर्वशः ॥११

---

# अध्याय १४३

## धूपादि विविध विधियों का वर्णन

आचान्तोऽर्कं नमस्कृत्य शौचेषु शुचितामियात् । क्रियां यः कुरुते मोहादनाचम्येह नास्तिकः ॥१२
भवन्तीह क्रियाः सर्वा वृथा तस्य न संशयः । शुचिकामा हि वै देवा वेदैरेवमुदाहृताः ॥१३
इनोपासाकृतश्चैव सर्वे देवाः प्रयत्नतः । शौचमेव प्रशंसन्ति शौचाङ्गैर्हि विधीयते ॥१४
आचान्तो मौनमास्थाय देवागारं ततो व्रजेत् । श्वासरोधनिमित्तं तु प्राणमाच्छाद्य वाससा ॥१५
शिरः प्रावृत्य यत्नेन केशोदकनिवृत्तये । ततः पूजां रवेः कुर्यात्पुष्पैर्नानाविधैः शुभैः ॥१६
गायत्रीं सशिरस्कां च यजमानः प्रयत्नतः । धूपं ततोऽग्नये दद्यात्प्रथमं गुग्गुलाहुतम् ॥१७
पुष्पाञ्जलिं ततो गृह्य तच्छिखायां प्रयत्नतः । रवेर्मूर्धनि तं दद्याद्देवमन्त्रमुदाहरन् ॥१८
ॐ व्रतेन यद्व्रतिनो वर्जयन्ति देवा मनुष्याः पितरश्च सर्वे । तस्यादित्यं प्रसरं च मनामहे यस्तेजसा
प्रथमं नाविभाति ॥१९

धूपवेलाः स्मृताः पञ्च धूपेष्वेव तु पञ्चसु । हवनाद्याः क्रियाः पञ्च रक्षिष्येऽहं तथा पुनः ।२०
दण्डनायकवेला तु प्रत्यृक्षे ऋक्षदर्शनात् । नाज्ञावेला प्रदोषस्तु तत्त्वकार्यं विजानता ॥२१
त्रिकालं तु रवेः पूजा कर्तव्या सूर्यदर्शनात् । अर्धोदितस्तु पूर्वाह्णे ततोऽर्द्धस्तु रर्विविभुः ॥२२
हेलयेति च पूर्वाह्णे मध्याह्ने ज्वलनाय च । तथैव मण्डले देयं नीचाह्ने ज्वलनाय च ॥२३
चन्दनोदकमिश्राणि गन्धोदकयुतानि च । पद्मानि करवीराणि तथा रक्तोत्पलानि च ॥२४

---

करे ।११। पवित्र देश में आचमन के उपरांत सूर्य को नमस्कार करने से पवित्रता प्राप्त होती है । जो बिना आचमन किये इस क्रिया की (आरम्भ एवं समाप्ति) करता है वह नास्तिक कहा जाता है ।१२। एवं उसकी सभी क्रिया व्यर्थ हो जाती है, इसमें संशय नहीं । क्योंकि वेद में बताया गया है कि देवता

कुसुमोदकमिश्राणि कुरुंटकुसुमं तथा । गन्धादीनि च दिव्यानि कृत्वा वै ताम्रभाजने ॥२५
धूपं दत्त्वाग्नये वीर प्रयत्नाद्गुग्गुलाहुतिम् । अर्घ्यपात्रं तदा गृह्य कुर्यादावाहनं रवेः ॥२६
एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां देव गृहाणार्घ्यं दिवाकर ॥२७
अनेनावाहनं कृत्वा जानुभ्यामवनीं गतः । रवेर्निवेदयेदर्घ्यमादित्यहृदये गतः ॥२८
ॐ नमोभगवते[1] आदित्याय विश्वाय खेशाय ब्रह्मणे लोककर्तृणे। ईशानाय पुराणाय सहस्राक्षाय ते नमः ॥२९
सोमाय ऋग्यजुरथर्वाय। ॐ भूर्भुवः स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ब्रह्मणे मुण्डे मध्ये पुरतः ॥
आदित्याय नमः
॥३०

## नारद उवाच

सावित्र्याश्च परे तन्त्रे त्रैलोक्यत्राणकारिणे । परितः परिगृह्याथ धूपभाजनमुत्क्षिपेत् ॥३१
निवेदयेत्ततो धूपं वाचमेतामुदीरयेत् । त्वमेक एव रुद्राणां वसूनां च पुरातनः ॥३२
देवानां गीर्भिरभितः संस्तुतः शाश्वतो दिवि । पूर्वाह्णे च तथा तेन मध्याह्ने चापरेण तु ॥३३
ॐ नमो भगवते ज्ञानात्मने त्वां च । विष्णोस्तत्परमं पदं सदा पश्यति सूरयः ॥३४
दिवाकरस्तु सायाह्ने मन्त्रेणार्घ्यं निवेदयेत् । ॐ नमो वरुणाय शम्भवे ॥३५

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥३६

---

गन्धादि ताँबें के पात्र में रख कर हे वीर ! प्रथम गुग्गुल की धूप अग्नि को अर्पित करे पश्चात् अर्घ्यपात्र हाथ में लेकर सूर्य का आवाहन करें ।२४-२६। हे सूर्य हे सहस्रांशो ! ...

अनेन विधिना दत्त्वा धूपं सूर्याय भोजकः। उत्क्षिपेच्चैव धूपेन विशेद्गर्भगृहं ततः ॥३७
ततः प्रविश्य धूपं तु प्रतिमायै निवेदयेत् । मन्त्रेण मिहिरायेति निक्षुभायेति नित्यशः ॥३८
ततो राज्ञै नमश्चेति निक्षुभायै ततो नमः । दण्डनायकसंज्ञाय पिङ्गलाय च वै नमः ॥३९
तथा राज्ञाय स्रौषाय तथेशाय गरुत्मते । ततः प्रदक्षिणं कुर्वन्दिग्देवेभ्यो निवेदयेत् ॥४०
दिण्डिने तु ततो दद्याद्धेमन्ताय यदूत्तम । महेश्वराय दद्यात्तु तथा व्योमाय यादव ॥४१
(विश्वेभ्यो देवेभ्यो नमः । रुद्रेभ्यो नमः) । ॐ ब्रह्मणे मुण्डपतये आदित्याय पुरुषेश्वराय सूर्याय नमोनमः ॥४२

ॐ अनेककान्तये नत्वा शेषाय वासुकितक्षककर्कोटकाय पद्मशङ्खकुलिकेभ्यो नागराजेभ्यो नमः ॥४३
तलसुतलपातालातलवितलरसातलादिवासिभ्यो दैत्यादानवपिशाचेभ्यो नमः । ततः प्रदक्षिणं कुर्यान्मातृकाभ्यो नमोनमः (ॐ ग्रहेभ्यो नमः ॥४४ ॐ दण्डनायकाय नमः । ॐमार्तंडाय नमः । ॐ विनायकाय नमः॥४५)

एवमुद्दिश्य नामानि धूपं दत्त्वा वरानन । उत्क्षिप्तो यत्र वै धूपो मुक्त्वा तत्रैव तं पुनः ॥४६
सूर्यगुप्तैरभिष्टूय एवं विज्ञाय ते ततः । अर्चितस्त्वं यथा शक्त्या मया भक्त्या विभावसो ॥
ऐहिकामुष्मिकीं नाथ कार्यसिद्धिं ददस्व मे ॥४७
एवं त्रिषवणं स्नात्वा यो़ऽर्चयेत्प्रणतो रविम् । विधिना तु यथोक्तेन सोऽश्वमेधफलं लभेत् ॥४८
यश्चैवं कुरुते नित्यं यथोक्तं धूपविस्तरम् । स पुत्रवानरोगी च मृतःसंलीयते रवौ ॥४९
विधिना तु यथोक्तेन क्रियमाणानि यत्नतः । सर्वकार्याणि सिद्ध्यन्ति सफलानि भवन्ति च ॥५०

पुष्पं श्रेष्ठं यदा न स्यात्पत्राणि समुपाहरेत् । पत्रं न स्यात्ततो धूपं धूपो न स्यात्ततो जलम् ।।५१
सर्वं न स्याद्यदा चैव प्रणिपातेन पूजयेत् । अशक्तः प्रणिपातस्य मनसा पूजयेद्रविम् ।।५२
असम्भवे तु द्रव्याणां विधिरेष प्रकीर्तितः । द्रव्याणां सम्भवे चैव सर्वमेवोपहारयेत् ।।५३
मन्त्रैः कर्मयुतो यस्तु मित्रे धूपं निवेदयेत् । उच्चारणाच्च वै तेषां धूपप्रीतो भवेद्रविः ।।५४
शिरो नासामुखं चैव भृशमावृत्य यत्नतः । पूजयेद्भास्करं वीर शिथिलं[1] तु न कारयेत् ।।५५
नलिनेन तु राजेन्द्र नरो याति दिवाकरम् । तस्माद्युक्तं सदा कार्यं पूज्यते च दिवाकरः ।।५६
तेऽश्वमेधफलं प्राप्य सूर्यलोकं व्रजन्ति हि । धूपेन पूज्यमानं तु नराः पश्यन्ति यादव ।।५७
यान्ति ते परमं स्थानं यत्र पश्यन्ति सूरयः । क्रियमाणं तथार्कं च भक्त्या पश्यन्ति ये नराः ।।
सर्वान्कामानिह प्राप्य ते यान्ति परमं पदम् ।।५८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने
धूपादिविविधवर्णनं नाम त्रिचत्वारिंशदधिकशततमोऽध्यायः ।१४३।

---

कार्यों की सफलता प्राप्त होती है ।५०। यदि उत्तम पुष्पों का अभाव न हो तो यत्न द्वारा उसके अभाव में धूप और धूप के अभाव में केवल जल द्वारा पूजन करना चाहिए ।५१। सभी का अभाव हो तो, केवल विनम्र हो कर सूर्य की पूजा करे। अशक्त पुरुष नम्र होकर मन द्वारा (मानसिक) सूर्य की पूजा करे ।५२। द्रव्य न होने पर यह विधान बताया गया है, द्रव्य के रहते हुए सभी उपहारों समेत पूजन करने

# अथ चतुश्चत्वारिंशदधिकशततमोऽध्यायः

## भोजकस्योत्पत्तिवर्णनम्

### सुमन्तुरुवाच

अथाजगाम भगवान्व्यासो द्वारवतीं पुरीम् । द्रष्टुं नारायणं देवं शङ्खचक्रगदाधरम् ॥१
तमागतमृषिं दृष्ट्वा वासुदेवो विशांपते । अभ्युत्थाय महातेजाः पूजयामास भारत ॥२
स्वयमेवासनं दत्त्वा पाद्यमर्घ्यं तथैव च । पप्रच्छ प्रयतो भूत्वा व्यासं सत्यवतीसुतम् ॥३
य एते भोजका विप्रा आनीता मत्सुतेन वै । शाकद्वीपमितो गत्वा ज्ञानिनो मोक्षगामिनः ॥४
तान्दृष्ट्वा रूपतो विप्र प्रवेशात्कर्मतस्तथा। कौतूहलं समुत्पन्नं हर्षश्च परमो मम ॥५
कथमेते क्षणमपि तिष्ठन्ते पृथिवीतले । येषां रविः सदा पूज्यस्तेषां मुक्तिः सदा वसेत् ॥६
नागत्वा भोजकत्वं हि मोक्षमाप्नोति कश्चन । इदं मे मनसो ब्रह्मन्सदा सम्प्रतिभाति वै ॥७

### व्यास उवाच

एवमेव यथात्थ त्वं शङ्खचक्रगदाधर । धन्या एते महात्मानो भोजका नात्र संशयः ॥८
ये पूजयन्ति सततं भानुमन्तं दिवाकरम् । ज्ञानिनः कर्मनिष्ठाश्च सदा मोक्षगतिं गताः ॥९
यजन्ते सततं भानुं बलिपुष्पफलैस्तथा । अन्नेनौषधिभिश्चैव आज्यहोमैश्च कृत्स्नशः ॥१०

---

# अध्याय १४४

होमं च शाश्वतं कृत्वा परं होमं ततः श्रिताः । परहोमस्य करणात्पूतात्मानो ह्यकल्मषाः ॥११
विशन्ति परमां दिव्यां भास्करीं तैजसीं कलाम् । कर्मणः साधने चैका तत्र चाग्नौ प्रतिष्ठिता ॥१२
वायुमार्गस्थिता व्योम्नि द्वितीयान्तः प्रकाशिका । ततः परं तृतीया तु तत्स्मृतं सूर्यमण्डले ॥१३
मण्डलं तच्च सवितुर्दिव्यं ह्यजरमव्ययम् । तस्याऽसौ पुरुषो मध्ये योऽसौ सदसदात्मकः ॥१४
क्षराक्षरस्तु विज्ञेयो महासूर्यस्तथैव च । निष्कलः सकलश्चापि द्वौ च तस्य प्रकल्पितौ ॥१५
अक्षरः सकलश्चैव सर्वभूतव्यवस्थितः । सतत्त्वः सकलः प्रोक्तस्तत्त्वहीनस्तु निष्कलः ॥१६
तृणगुल्मलतावृक्षवृकसिंहद्विजाधिपान् । सुरसिद्धमनुष्यांश्च स्थलजाञ्जलजान्हरेत् ॥१७
व्यवस्थितः स सर्वत्रः सर्वेषामन्तरात्मनि । यदा कल्पात्मकश्चैव द्वितीयां तनुमाश्रितः ॥१८
निष्कलस्तु सदा ज्ञेयः संस्थितस्तैजसीं कलाम् । हिमं घर्मं च वर्षं च त्रैलोक्ये कुरुते सदा ॥१९
द्वितीया या तनुस्तस्य अक्षरं तत्परं पदम् । देवयानं तु पन्थानं कर्मयोगेन संस्थिता ।२०
आदित्यसिद्धान्तरिताः साङ्ख्ययोग विदश्च ये । तेऽभिगच्छन्ति तत्स्थानं स मोक्षः परिकीर्तितः ॥२१
निर्द्वन्द्वो निर्गमश्चैव तत्र गत्वा न शोचति । वेदेषु ब्रह्म वदन्ति ध्यायन्ते तत्त्ववेदिनः ॥२२
ॐकारं तत्त्वतश्चापि ध्यायन्ते पुरुषोत्तम । त्र्यक्षरं च तमोंकारं सार्धमात्रात्रये स्थितम् ॥२३
वदन्ति चार्धमात्रस्थं मकारं व्यञ्जनात्मकम्। ध्यायन्ति ये मकारीयं ज्ञानं ते हि सदात्मकम् ॥२४

---

होम के करने से ही पवित्र एवं पाप मुक्त होते हैं ।११। इसीलिए ये परम दिव्य सूर्य की तेजस्वी कला में प्रविष्ट (सायुज्य मुक्त) होते हैं । सूर्य की एक कला, कर्मों के साधन के लिए अग्नि में स्थित हैं ।१२। इसी प्रकार दूसरी अन्तः प्रकाशिका कला आकाश में वायु-मार्ग में स्थित है, उसके पश्चात् तीसरी कला सूर्य मण्डल में स्थित है ।१३।

मकारो भगवान्देवो भास्करः परिकीर्तितः । मकारध्यानयोगाच्च मगा ह्येते प्रकीर्तिताः ॥२५
धूपमाल्यैर्युतश्चापि उपहारैस्तथैव च । भोजयन्ति सहस्रांशुं तेन ते भोजकाः स्मृताः ॥२६

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने भोजकस्योत्पत्तिवर्णनं नाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।१४४।

# अथ पञ्चचत्वारिंशदधिकशततमोऽध्यायः

## भोजकज्ञानवर्णनम्

### वासुदेव उवाच

ज्ञानोपलब्धिं विप्रेन्द्र भोजकानां महामुने । ब्रूहि तत्त्वं द्विजश्रेष्ठ कौतुकं परमं मम ॥१

### व्यास उवाच

इमां ज्ञानोपलब्धिं तु निबोध गदतो मम । अस्थिस्थूलं स्नायुयुतं मांसशोणितलेपनम् ॥
चर्मावनद्धं दुर्गंधिपूर्णं मूत्रपुरीषयोः ॥२
जराशोकसमाविष्टं रोगायतनमातुरम् । रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥३
कपालं वृक्षमूलानि कुचैलमसहायता । समता सर्वभूतेषु एवं मुक्तस्य लक्षणम् ॥४

---

सदात्मक का ध्यान करता है ।२४। क्योंकि मकार रूप भगवान भास्कर देव बताये गये हैं, मकार के ही ध्यान करने से वे लोग मग कहलाते हैं ।२५। इस प्रकार धूप, माला, एवं उपहार प्रदान पूर्वक सूर्य को भोजन कराने के नाते वे भोजक कहे जाते हैं ।२६

तिले तैलं गवि क्षीरं काष्ठे पावकसन्ततिः । उपायं चिन्तयेदस्य धिया धीरः समाहितः ॥५
प्रमाथि च प्रयत्नेन मनः संयम्य चञ्चलम् । बुद्धीन्द्रियाणि संयम्य शकुनानिव पञ्जरे ॥६
इन्द्रियैर्नियतैर्देही धाराभिरिव तृप्यते । सततममृतस्यैव जनार्दन महामते ॥७
प्राणायामैर्दहेद्दोषान्धारणाभिश्च[1] किल्बिषम् । प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥८
ध्यायमानस्य दह्यन्ते चान्ते दोषा यथाग्निना । तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥९
चित्तं चित्तेन संशोध्य भावं भावेन शोधयेत् । मनस्तु मनसा शोध्यं बुद्धिं बुद्ध्या तु शोधयेत् ॥१०
चित्तस्यातिप्रसादेन भाति कर्म शुभाशुभम् । शुभाशुभविनिर्मुक्तो निर्द्वन्द्वो निष्परिग्रहः ॥
निर्ममो निरहङ्कारस्ततो याति परां गतिम् ॥११
पर्वाह्णे लोहितं रूपं प्रथममृङ्ममयं स्मृतम् । यजुर्मयं द्वितीयं तु श्वेतं माध्याह्निकं स्मृतम् ॥१२
कृष्णं तृतीयं सायह्नि साम्नो रूपं तु तत्स्मृतम् । प्रथमं राजसं देव द्वितीयं सात्त्विकं स्मृतम् ।१३
तृतीयं तामसं रूपं त्रैगुण्यं तस्य कल्पितम् । त्रयाणां व्यतिरेकेण चतुर्थं सूर्यमण्डलम् ॥१४
ज्योतिः प्रकाशकं सूक्ष्मं प्रोक्तं देवनिरञ्जनम् । चतुर्थं तु वेदविदः सूर्यसिद्धान्तवेदिनः ॥१५
ॐकारप्रणवैर्युक्ता ध्याननिर्धूतकल्मषाः । स्थिताः पद्मासने वीरा नाभिसंन्यस्तपाणयः ॥१६

---

रखना, ये सब मुक्तहोने के लक्षण हैं ।४। तिल में तेल, गाय में क्षीर, एवं काष्ठ में अग्नि के अदृष्ट रहने की भाँति सभी पदार्थों में अदृष्ट परमात्मा की प्राप्ति रूप मोक्ष के लिए धीर समाधि निष्ठ पुरुष को सदैव प्रयत्नशील रहना चाहिए कि वह किस उपाय द्वारा प्राप्त होगा ।५। (प्रथम) प्रयत्न पूर्वक मंथन करने वाले चंचल मन को अपने अधीन कर पिंजड़े में पक्षियों की भाँति बुद्धि इन्द्रियों (ज्ञानेन्द्रियों) को अपने अधिकार में रखकर हे जनार्दन, हे महामते ! अमृत धारा में प्राप्त होने की भाँति प्राणी वश में की हुई

सुषुम्नानाडिकामार्गं कुम्भरेचकपूरकैः । त्रिभिः संशोध्य तान्पञ्च मरुतो देहम[illegible]न् ॥१७
पदाङ्गुष्ठान्वितः स्विन्नमूर्ध्वमुत्क्षेपयेत्क्रमात् । नाभिदेशे तु तं दृष्ट्वा देवमग्निमनामयम् ॥१८
सोमं च हृदये दृष्ट्वा मूर्ध्नि वाग्निशिखां ततः । वातरश्मिभिरासाद्य तं भित्त्वा मण्डलं परम् ॥१९
ततः परं तु यो गच्छेद्योगस्थः सूर्यमण्डलम् । यत्र गत्वा न शोचन्ति तत्सौरं परमं पदम् ॥२०
देवार्चनं महाबाहो कीर्तितः केशिसूदन । प्रथमं हृदयं स्थानं द्वितीयं चाग्निमाश्रितम् ॥२१
तृतीयं नाभिसंस्थं च चतुर्थं सूर्यमण्डलम् ॥२२

स्थानं परं वै परमात्मसंस्थं भानोः सुरेशस्य वदन्ति तज्ज्ञाः ।
ज्ञेयः स मोक्षश्च नृणां स एव संसारविच्छित्तिकरं पदं ततः ॥२३
इदममृतसमं परस्य वेद्यं किरणसहस्रमृतो हितं जनानाम् ।
ऋषिचरितमवेत्य तत्त्वसारं व्यपगतमोहधियः प्रयान्तिमोक्षम् ॥२४
इदं मगानां चरितं मया ते प्रख्यापितं यानवरेण युक्तम् ।
ज्ञात्वात्विमं मोक्षविदो वदन्ति सिद्धाश्च तत्स्थानमवाप्नुवन्ति ॥२५

यन्मयोक्तमिदं ज्ञानं देयं श्रद्धावतां नृणाम् । नास्तिकानामबुद्धीनां न देयं भूतिमिच्छता ॥२६

## सुमन्तुरुवाच

इत्युक्त्वा भगवान्व्यासो भोजकज्ञानमुत्तमम् । नारायणं महाबाहो जगमायतनं हरेः ॥२७

---

हाँथ रखे।१६। उपरान्त कुंभक, रेचक, तथा पूरक रूप प्राणायाम द्वारा सुषुम्णा नाड़ी के मार्ग का संशोधन करते हुए पैर के अंगूठे से लेकर समस्त शरीर में चलने वाले उन पाँचों वायुओं को क्रमशः उपर की ओर

ख्यातो यस्त्रिषु लोकेषु गंगया परितोषितः । बदर्या मण्डितो वीर नरनारायणाश्रमः ॥२८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे भोजकज्ञानवर्णनं
नाम पञ्चचत्वारिंशदधिकशततमोऽध्यायः ।१४५।

# अथ षट्चत्वारिंशदधिकशततमोऽध्यायः

## भोजकवर्णनम्

### शतानीक उवाच

य एते भोजकाः प्रोक्ता देवदेवस्य पूजकाः । नान्यं भोज्यमथैतेषां ब्राह्मणैश्च कदाचन ॥१
भास्करस्य प्रिया ह्येते पूज्यत्वं च तथा गताः । दिव्याश्चैते स्मृता विप्रा आदित्याम्भःसमुद्भवाः ॥२
अभोज्यत्वं कथं याता भोजकास्तद्वदस्व मे । किं कुर्वाणास्तथा कर्म भोज्यतां यान्ति मे वद ॥३

### सुमन्तुरुवाच

इममर्थं पुरा पृष्टो वासुदेवो महीपते । कृतवर्मणा पुरा राजंस्तथा साम्बो महाबलः ॥४
गतौ साम्बपुरीं वीर तथा नारदपर्वतौ । भुक्तवन्तो गृहे सर्वे भोजकस्य महात्मनः ॥५
आदित्यकर्मणो लोके देवान्नख्यातिमागताः । तेन ते पूजिताः सर्वे भक्त्या भोज्यैरनेकशः ॥६
आगतास्ते पुरीं वीर पुण्यां द्वारवतीं विभोः । तावृषी दिवमारुढौ राजन्नारदपर्वतौ ।७

---

हे महाबाहो ! हे वीर ! विष्णु के उस लोक को प्रस्थान किया जो तीनों लोकों में ख्याति प्राप्त गंगा एवं बदरी से भूषित तथा नरनारायणाश्रम के नाम से प्रसिद्ध है ।२७-२८

वासुदेवं महातेजा हार्दिक्यो वाक्यमब्रवीत् । य एते भोजका विप्र पूजका भास्करस्य तु ॥८
अन्नमेषां कथं विप्रौ भुक्तवन्तौ जनार्दन । तावृषी दिव्यमाख्यातौ यौ तौ नारदपर्वतौ ॥
अभोज्याः किल एते वै ब्राह्मणानां जनार्दन ॥९

### वासुदेव उवाच

न ते भोज्या महाबाहो भोज्या भोजाश्च सर्वदा । अभिवाद्यां प्रयत्नेन यथादित्यो महामते ॥१०
आचरन्तश्च तत्कर्म भोज्यत्वं प्रव्रजन्ति ते । तच्छ्रूयतां यदुश्रेष्ठ यत्कार्यं चापि तैर्विभो ॥
यतमानैर्महाबाहो तदिहैकमनाः शृणु ॥११
वृषली यस्य वै भार्या यश्चाव्यङ्गं न धारयेत् । अभोज्यः स तु विज्ञेयो भोजको नात्र संशयः ॥१२
अस्नातः पूजयेद्यस्तु तथाभ्यङ्गविवर्जितः । आदित्यं यदुशार्दूल तथा च विधिना विभो ॥१३
सेवको भोजको यस्तु शूद्रान्नं येन भुज्यते । कृषिं च कुरुते यस्तु देवार्चामपि वर्जयेत् ॥१४
जातकर्मादयो यस्य न संस्काराः कृता विभो । आरुणेयैश्च मन्त्रैश्च सावित्रीं न च वै पठेत् ॥
तस्य गेहे द्विजो भुक्त्वा कृच्छ्रपादेन शुध्यति ॥१५
पितृदेवमनुष्याणां भूतानां भास्करस्य तु । अकृत्वा विधिवत्पूजां यस्तु भुङ्क्ते स धर्महा ॥१६
अभ्यङ्गेन विहीनो यः शंखहीनस्तथैव च । शिरसा धारयेत्केशान्स ज्ञेयो भोजकाधमः ॥१७
देवार्चनं तथा होमं स्नानं तर्पणमेव च । दानं ब्राह्मणपूजां च कुर्वतो भोजकस्य तु ॥
अभ्यङ्गेन विहीनस्य सर्वं भवति निष्फलम् ॥१८

---

...वासुदेव से प्रिय वाणी द्वारा पूँछा—ये भोजक

सर्वदेवमयो ह्येष सर्ववेदमयस्तथा । अभ्यङ्गो यदुशार्दूल पवित्रः परमः स्मृतः ॥१९
भोजकानां यदुश्रेष्ठ तस्य मूले स्थितो हरिः । मध्ये ब्रह्मा महातेजा अग्रे गोश्रुतिभूषणः ॥२०
ऋग्वेदो यस्य मूलस्थो मध्ये सामानि कृत्स्नशः । यजुर्वेदस्तथा श्रेष्ठश्चाथर्वसहितः स्थितः ॥२१
त्रयोऽग्नयस्तथा राजंस्त्रयो लोकाः स्थिताः क्रमात् । एवमेष पवित्रस्तु अभ्यङ्गो भोजकस्य तु ॥२२
यस्त्वनेन विहीनस्तु भोजको भोजकाधमः । अभोज्यः स तु विज्ञेयः सोऽशुचिर्नात्र संशयः ॥२३
निर्माल्यमथ नैवेद्यं कुङ्कुमं देवहेलिनाम् । ये प्रयच्छन्ति शूद्राणां विक्रीणन्ति च भोजकाः ॥
तेऽधमा भोजका ज्ञेया ये च देवस्वहारिणः ॥२४
न पूजयन्ति देवेशं देवस्वं क्षपयन्ति च । न ते देव प्रियास्तात विज्ञेया भोजकाधमाः ॥२५
यस्मिन्न भुक्ते नैवेद्यं भोजकोऽश्नातिमानद । तदन्नं भुङ्जतस्तस्य नरकाय न शान्तये ॥२६
नैवेद्यं भोजयेत्तस्माद्भास्करस्य नरः सदा । प्रथमं यदुशार्दूल तच्च देहविशोधनम् ॥२७
ब्राह्मणानां पुरोडाशो यथा कायविशोधनः । भोजकानां तथा वीर नैवेद्यं कायशोधनम् ॥२८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने भोजकवर्णनं नाम षट्चत्वारिंशदधिकशततमोऽध्यायः ।१४६।

---

सर्वदेवमय एवं सर्ववेदमय होने केनाते अभ्यंग अत्यन्त पवित्र बताया गया है । यदुश्रेष्ठ ! भोजकों के उस अभ्यंग के मूलभाग में विष्णु, मध्य भाग में महातेजस्वी ब्रह्मा, अग्रभाग में कान में किरण रूपी कुण्डल धारण करने वाले (सूर्य) स्थित रहते हैं । जिसके मूल भाग में ऋग्वेद, मध्य में समस्त सामवेद तथा

# अथ सप्तचत्वारिंशदधिकशततमोऽध्यायः

## भोजकब्राह्मणवर्णनम्

### वासुदेव उवाच

अत्र पृष्टो यथा देवो भास्करो देवपूजितः । अरुणेन महाबाहो के प्रिया भोजकास्तथा ।।१
पूजायां तव के योग्याः के न योग्या भवन्ति च । इति पृष्टः स भगवानरुणेन दिवाकरः ।।
यदुवाच महाबाहो तदिहैकमनाः शृणु ।।२

### भास्कर उवाच

परदारान्परद्रव्यं ये न हिंसन्ति भोजकाः । ते प्रिया मम वै नित्यं ये न निंदन्ति दैवतान् ।।३
वाणिज्यं कृषिसेवां तु वेदानां निन्दनं च ये । कुर्वन्ति भोजका ज्ञेयाः सर्वे ते मम वैरिणः ।।४
येषां भार्यासङ्ग्रहणं कर्षणं ये प्रकुर्वते । नृपसेवां खगश्रेष्ठ विज्ञेयाः पतितास्तु ते ।।
भुञ्जते ये च शूद्रान्नं ज्ञेयास्ते शत्रवो मम ।।५
पूजा कृता तु या तैस्तु तथार्घ्यं च खगोत्तम । पूजां तामथ चाप्यर्घ्यं नाहं गृह्णामि खेचर ।।६
य एते कथिता वीर ये च शङ्खविवर्जिताः । निर्माल्यं ये मदीयं तु नैवेद्यं कुङ्कुमं तथा ।।७
शूद्राय ये प्रयच्छन्ति विकीर्णन्ति च ये खग । यच्छन्ति ये च वैश्याय भोजका मे न ते प्रियाः ।।८
यजन्ते ये च सावित्रीं महाश्वेतां च गोपतेः । ये न जानन्ति मे मुद्रां किङ्कराणां च नामतः ।।९

य एते[1] कथिता वीर भोजकास्ते मया खग । नैते पूजयितुं शक्ता ये प्रिया मम भोजकाः ॥
ताञ्छृणुष्व खगश्रेष्ठ भूत्वा चैकाग्रमानसः ॥१०
देवद्विजमनुष्याणां पितॄणां चापि पूजकाः । ते प्रिया मम वै नित्यं शक्ताः पूजयितुं रविम् ॥११
येषां मुण्डं शिरो नित्यं ये चाभ्यङ्गसमन्विताः । वादयन्ति च ये शङ्खं दिव्यास्ते भोजका मताः ॥१२
त्रिकालं ये च मां नित्यं सुस्नाताः क्रोधवर्जिताः । पूजयन्ति खगश्रेष्ठ ते प्रिया मम भोजकाः ॥१३
वारे मदीये नक्तं तु षष्ठ्यां ये च प्रकुर्वते । सप्तम्यामुपवासं तु तथा सङ्क्रमणे मम ॥१४
दिव्यास्ते ब्राह्मणा ज्ञेया भोजका मम पूजकाः । पूजयन्ति च ये विप्रान्मद्भक्ता मत्परायणाः ॥
ते प्रियाः सततं मह्यं भोजका गरुडाग्रज ॥१५
मयि भक्तिं न कुर्वन्ति ब्राह्मणान्पूजयन्ति नो । न ते पूज्या न वन्द्याश्च ये द्विषन्ति च मां सदा ॥१६
ये कुर्वन्ति महायज्ञान्भोजका गरुडाग्रज । पितृदेवमनुष्याणां पूजार्थं सन्ततं खग ॥१७
प्रियास्ते सततं वीर भोजकानां तथोत्तमाः । तस्मात्सर्वप्रयत्नेन पञ्चयज्ञान्प्रवर्तयेत् ॥१८
एकभक्तेन ये नित्यं वर्तन्ते कश्यपात्मज । भुञ्जते न च ये रात्रौ भोजकास्ते प्रिया मम ॥१९
मम वारे च ये वीर तथा षष्ठ्यां च केशव । न रात्रौ भुञ्जते प्राज्ञा मत्प्रियास्ते मगाः खग ॥२०
प्रतिसंवत्सरं ये तु भोजका गरुडाग्रज । न यच्छन्ति पितुर्मातुर्दिवसे तेन मे प्रियाः ॥२१
इत्थं भूता भोजका या माघमासे च सप्तमी । पुष्पाणां करवीराणि तथा रक्तं च चन्दनम् ॥२२

---

जानने वाला, वीर ! ये सभी भोजक मेरी पूजा करने में असमर्थ होते हैं। मेरे प्रिय भोजकों को खगश्रेष्ठ ! सावधान होकर सुनो ।९-१०। देव, द्विज, एवं मनुष्यों की पूजा करने वाला भोजक मुझे सदैव प्रिय हैं, वे ही सूर्य की पूजा करने में समर्थ हैं ।११। जिनके शिर सदैव मुण्डित, अभ्यंग युक्त होकर

वाचको ब्राह्मणानां तु नैवेद्यं मोदकास्तथा । घृताहुत्यो गुग्गुलश्च क्षीरेण स्नपनं तथा ॥२३
वाद्यानां शङ्खशब्दश्च नृत्यं नाटयं मतं मम । पञ्चवर्णा पताकास्तु श्वेतं छत्रं च मे प्रियम् ॥२४
नान्यवर्णैः कृता पूजा तथा प्रीणाति मां खग । यथा कृता भोजकेन पूजा प्रीणाति मां सदा ॥
नान्यदेवप्रतिष्ठा तु कर्तव्या भोजकेन तु ॥२५

## वासुदेव उवाच

इत्युक्त्वा भगवान्देवश्चारुणाय पुरानघ । लक्षणं भोजकानां तु ततो मेरुमथाक्रमत् ॥२६
एवं भोज्या भोजकास्तु न चाभोज्याः कदाचन । अनुष्ठानविहीना ये न ते भोज्यास्तु भोजकाः ॥२७
भौमास्तु ब्राह्मणा ये तु अनुष्ठानविवर्जिताः । तेऽप्यभोज्या भवन्तीह विकर्मस्था विशेषतः ॥२८
नास्ति पूज्यतमं किञ्चिन्माङ्गल्यं पावनं तथा । चतुर्णामिह वर्णानां मुक्त्वा भोजकमुत्तमम् ॥
पूजिते भोजके वीर आदित्यः पूजितो भवेत् ॥२९
भुञ्जते यस्य वै गेहे भोजका यदुनंदन । तस्य भुङ्क्ते स्वयं भानुर्ब्रह्मा विष्णुस्तथा शिवः ॥३०
यथेह सर्वसत्त्वानां प्रधानत्वे स्थितो रविः । तथेह सर्वभूतानां भोजकः पूज्य उच्यते ॥३१
तीर्थानां तु कुरुक्षेत्रं सरसां सागरो यथा । तथा पूज्यतमो ज्ञेयः पूज्यानां भोजको विभो ॥३२
विशेषेण च सौराणां भोजकः पूज्य उच्यते । भर्ता पूज्यो यथा स्त्रीणां शिष्याणां च यथा गुरुः ॥
भोजकस्तु तथा पूज्यः सौराणां हृदिकात्मज ॥३३

---

का स्नान, वाद्यों तथा शंख की ध्वनि, नृत्य, गान पाँच रंग की पताका और आत्म प्रिय हैं श्वेत छत्र के प्रदान पूर्वक मेरी पूजा करने वाले हैं, मुझे अत्यन्त प्रिय है। आकाश गमन करने वाले! अन्य वर्ण के ... उतनी प्रसन्नता नहीं होती है, जितनी कि सदैव की गई भोजक की पूजा

यस्य भुङ्क्ते भोजकस्तु गन्धपुष्पादिनार्चितः । तस्य भुङ्क्ते स्वयं भानुः पितरो देवतास्तथा ॥३४
एवं पूज्यास्तथा भोज्या भोजका हृदिकात्मज । ये सौरा भोजकस्यान्नं भुंक्ते निर्विकल्पतः ॥
ते सर्वे पापनिर्मुक्ता यान्ति सूर्यसलोकताम् ॥३५
कथितो यत्र यो भोज्यो यथा भोज्यः स वर्जितः । अथ किं बहुनोक्तेन श्रूयतां वचनं मम ॥३६
नास्ति वेदात्परं शास्त्रं नास्ति गङ्गासमा सरित् । अश्वमेधसमं पुण्यं नास्ति पुत्रसमं सुखम् ॥३७
नास्ति भानुसमो देवो नास्ति मातृसमा गतिः । यथैतानि समस्तानि उत्तमानि यदूत्तम ॥
तथोत्तमो भोजकस्तु सम्प्रोक्तो भास्करेण तु ॥३८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने भोजकलक्षणवर्णनं नाम सप्तचत्वारिंशदधिकशततमोऽध्यायः ।१४७।

# अथाष्टचत्वारिंशदधिकशततमोऽध्यायः

## कालचक्रवर्णनम्

### सुमन्तुरुवाच

अथ साम्बो महातेजा दृष्ट्वा चक्रं पितुः करे । ज्वालामालाकरालं तु महता तेजसान्वितम् ॥१
पप्रच्छ पितरं साम्बो भक्त्या श्रद्धासमन्वितः । कुतस्तात त्वया प्राप्तं चक्रमादित्यसन्निभम् ॥२

---

लोगों के पूज्य भोजक बताये गये हैं । जिसके यहाँ गन्ध एवं पुष्पादि से पूजित होकर भोजक भोजन करता है, उसके यहाँ सूर्य, पितृगण, एवं देवता लोग भोजन करते हैं ।३३-३४। हृदिकात्मज (प्रियपुत्र) इस प्रकार के भोजक पूज्य एवं भोज्य हैं जो सौर लोग भोजकों के अन्न का [illegible]

किमर्थं वहते देव दिव्यमायुधमुत्तमम् । एतदाख्याहि मे सर्वं श्रोतुकामस्य[1] कौतुकात् ।।३

## वासुदेव उवाच

साधुसाधु[2] महाबाहो साधु पृष्टोऽस्म्यहं त्वया । शृणुष्वैकमनाः पुत्र चक्रस्य विधिनिर्णयम् ।।४
दिव्यं वर्षसहस्रं तु भानुमाराध्य श्रद्धया । प्राप्तं चक्रं मया तस्माद्भास्कराल्लोकपूजितात् ।।५
नभोगः पञ्चकारूढः स्थितः साक्षाद्दिवाकरः । ग्रहाः सोमादयो यस्य संस्थिता नाभिमण्डले ।।६
आदित्या द्वादश समा अरेषु क्रमशस्तथा । प्रोक्तं पथिषु तत्त्वानि पृथिव्यादीनि यानि वै ।।७
एतैस्तत्त्वैः परिव्याप्तं चक्रं कालात्मकं परम् । संक्षेपात्ते मयाख्यातं दत्तं चक्रमिवापरम् ।।८

## साम्ब उवाच

कथं कालमयं देव चक्रं कमलमुच्यते । इदं तावन्ममाचक्ष्व ज्ञातुमिच्छामि तत्त्वतः ।।९

## वासुदेव उवाच

कमलं ह्यृतुभिः षड्भिः षड्दलं चाक्षयाश्रितम् । पुरुषाधिष्ठितं तद्धि तत्र साङ्गो रविः स्थितः ।।१०
यच्च कालत्रयं लोके तन्नाभित्रयमुच्यते । मासा अरा महाबाहो पक्षाश्च प्रधयः स्मृताः ।।११
नेमी चैव परे प्रोक्ते अयने दक्षिणोत्तरे । पथिनाभिषु योगे च योगाख्यास्तपनादिभिः ।।१२

---

उत्तम अस्त्र को आप क्यों धारण किये रहते हैं । इसे जानने के लिए मुझे महान् कौतूहल है, आप इन सभी बातों को बताने की कृपा करें ।३

**वासुदेव बोले**—महाबाहो ! बहुत अच्छा, बहुत अच्छा, जो तुमने इस प्रकार का उत्तम प्रश्न मुझसे

नक्षत्राणि ग्रहाश्चैव सदा चात्र स्थिताः स्मृताः । एतैर्व्याप्तमिदं चक्रं स्थूलसूक्ष्मप्रभेदतः ॥१३
अत्रोद्दिष्टेषु कालेषु ये नोद्दिष्टा मया तव । युगादिकल्पपर्यन्तास्तेऽपि चात्र स्थिताः क्रमात् ॥१४
यत्ते कालात्मकं चक्रमिदं संक्षेपतो मया । कथितं तद्विनिष्क्रान्तं प्रदीप्तात्सूर्यमण्डलात् ॥१५
असुराणां वधायेदं मया लब्धं दिवाकरात् । आराध्य तपसा सूर्यं पुरा कल्पे जगद्गुरुम् ॥
अतः सम्पूज्ययाम्येनं ग्रहैस्तत्त्वैर्वृतं सदा ॥१६
अर्कं भक्तो हि चक्रस्थं यः पूजयति भक्तिमान् । तेजसा रविसंकाशः पुष्पोत्तरपुरं व्रजेत् ॥१७
तस्मात्तं मत्कुलानन्दं मित्रं सम्पूजयाम्यहम् । ग्रहैस्तत्त्वैर्वृतं भक्त्या स्वमन्त्रैः सततं विभुम् ॥१८
सप्तम्यां चक्रमालिख्य ये यजन्ति दिवाकरम् । रक्तचन्दनपूर्णेन कुंकुमेन सुगंधिना ॥१९
पिष्टगन्धादिभिर्वापि रक्तवर्णकमिश्रकैः । रक्तैश्च कमलैः शुद्धैः करवीरैः सुगन्धिभिः ॥२०
अन्यैर्वा कुसुमैर्वन्यैः प्रत्यग्रैर्जन्तुवर्जितैः । अपर्युषितनिश्छिद्रैः शुभधन्यैर्दलैरपि ॥२१
फलैः पक्वैरोषधिभिस्तथा दूर्वाङ्कुरैः कुशैः । धूपैश्च विविधैर्गन्धैस्तथा वस्त्रैश्च भूषणैः ॥२२
भक्ष्यैर्भोज्यैश्च पेयैश्च चोष्यैर्लेह्यैश्च शक्तितः । वितानशोभासिकतैः पलाशैरुपशोभितैः ॥२३
छत्रचामरघण्टाभिर्भूषणैर्दर्पणादिभिः । नृत्यवादित्रगीतैश्च वेदैः पुण्यकथास्वनैः ॥२४
सर्वत्र जयघोषैश्च सम्पूर्णे पूजयन्ति ये । सम्पूर्णान्विविधान्कामान्निर्विघ्नान्प्राप्नुवन्ति ते ॥२५
स्वचक्रं चापि निर्विघ्नं वृद्धिमायाति सुव्रत । हन्यते परचक्रं च यत्रेदं पूज्यते सकृत् ॥२६

---

एवं सूक्ष्म रूप से इनसे व्याप्त है ।१३। इसमें जितने भाँति के काल बताये गये हैं, कुछ को मैंने तुम्हें नहीं
बताया है, वे सभी युगारम्भ से होकर कल्प पर्यन्त [illegible]

सङ्क्रान्तौ ग्रहणे चापि लिखित्वा यो जपेदिदम्। भवन्ति नियताः साम्ब तस्य सानुग्रहा ग्रहाः ।।२७
सर्वरोगविहीनस्तु सर्वदुःखविवर्जितः । चिरं जीवति धर्मात्मा सर्वैश्वर्यसमन्वितः ।।२८
एष वै कथितो वत्स चक्रयोगो मया तव । अर्कस्य सर्वयज्ञानां श्रेष्ठं सिद्धिप्रदो भृशम् ।।२९
पुण्यो धर्मस्तथा पुष्ट्यः शत्रुघ्नश्च विशेषतः । श्वेतो रक्तोऽथ पीतश्च कृष्णश्चापि विभागशः ।।३०

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने कालचक्रवर्णनं नामाष्टचत्वारिंशदधिकशततमोऽध्यायः ।१४८।

# अथैकोनपञ्चाशदधिकशततमोऽध्यायः

## सूर्यदीक्षावर्णनम्

### साम्ब उवाच

किं प्रमाणं लिखेच्चक्रं तत्र पद्मं च किं भवेत् । नेमिप्रध्यारनाभीनां विभागः क्रियते कथम् ।।१

### वासुदेव उवाच

चतुःषष्ट्यङ्गुलं चक्रं कृत्वा वृत्तं प्रमाणतः । अष्टाङ्गुला भवेन्नेमिः सेयं विभवतः सदा ।।२
नाभिक्षेत्रं तथैव स्यात्पद्मं तत्त्रिगुणं भवेत् । अरक्षेत्रं च पद्मस्य कर्णिकाकेसराणि च ।।३
केसरस्य च पादेन शेषपत्राणि कल्पयेत् । पत्रसन्धिश्च पादाङ्गं क्रमात्तत्रापि भिद्यते ।।४

---

ग्रहण काल में इसे (यन्त्र रूप में) लिखकर जो पूजन करता है, उसके सभी ग्रह अनुकूल रहते हैं ।२७।
समस्त रोग से शून्य, एवं सभी दुःखों से हीन होकर वह धर्मात्मा समस्त ऐश्वर्यों समेत चिरकाल का जीवन

उन्नतं कमलं तत्तु कुर्यान्नाभ्यां न संशयः । आकीर्णाः संविभक्ताश्च कर्तव्याः प्रधयः क्रमात् ॥५
अङ्गुलस्थूलमूलं स्यादराग्रं त्रिगुणं ततः । भूमिः पीता बर्हिर्ज्ञेया कर्णिकाकेसराणि च ॥६
सितं नाभिस्थलं तत्र द्वाराणि परिकल्पयेत् । हस्तमात्रं भवेत्तस्य तन्मानं द्वारसन्निभम् ॥७
शेषं रक्तं समुद्दिष्टं संहताः पत्रसन्धयः । नाभिनेम्यन्तरे लेखाः सिताश्चाङ्गुलमानतः ॥८
सितरक्तसिताभिश्च समन्तादुपशोभितम् । कपोलं द्वारपक्षं च द्वारकोणे प्रकल्पयेत् ॥९
चतुर्द्वारं भवेदेवमैन्द्रद्वारं प्रकल्पयेत् । अपराह्लेऽथ पूर्वाह्णे वरुणमावाहयेत्सदा ॥१०
द्वाराण्येतानि संवर्त्य यथोक्तविधिना यजेत् । यथोक्ता देवताः सर्वाः स्वमन्त्रैरेव भक्तितः ॥११
चक्रमेवं समुद्दिष्टं यजनार्थं मया तव । यज्ञेनानेन सम्बद्धो दीक्षितश्चार्कमण्डले ॥
इत्थं मे भानुना पूर्वमिदमुक्तं वरानन ॥१२

## साम्ब उवाच

के मन्त्राश्चक्रयज्ञेऽस्मिन्देवतानां प्रकीर्तिताः । यज्ञक्रमश्च कः प्रोक्तो रूपं किं च पृथक्पृथक् ॥१३

## वासुदेव उवाच

खषोल्कं हृदयाध्यक्षं पूर्वोक्ते कमले यजेत् । कर्णिकायां दलेष्वेवमङ्गानि हृदयादि च ॥१४
नाममन्त्राश्चतुर्थ्यंतास्तेषां पूर्वोक्तकोटयः । नमस्कारश्च सर्वत्र एष एव विधिः स्मृतः ॥१५

---

उन्नत करे, पुनः उसमें क्रमशः प्रधियाँ (पट्टियाँ) लगाये, जो पृथक्-पृथक् चारों ओर से घेर कर स्थित रहती हैं, अंजुल का स्थूल मूल भाग अर का क्षेत्र बताया गया है, जो उस तिगुने आकार का है, कर्णिका के केसर, उसकी पीले रंग की बाहरी भूमि है, श्वेत (कमल) नाभि स्थल है, वहाँ द्वार की कल्पना करनी

स्वाहान्ता होमकाले च कर्मस्वन्येषु ते पुनः । यथा कर्मावसानाश्च प्रयोक्तव्याः समासतः ॥१६
ॐ खषोल्काय विद्महे दिवाकराय धीमहि । तन्नः सूर्यः प्रचोदयात् ॥१७
सावित्री च महाबाहो चतुर्विंशाक्षरा मता । सर्वतत्त्वममयी पुण्या ब्रह्मगोत्रार्कवल्लभा ॥१८
एवं मन्त्राः प्रयोक्तव्याः सर्वकर्मस्वतंद्रितैः । अन्यथा विफलं कर्म भवेदिह परत्र च ॥१९
तस्मात्सर्वप्रयत्नेन मन्त्राञ्ज्ञात्वा विधिं तथा । यथावत्कर्म तत्कृत्वा साधयेदीप्सितं फलम् ॥२०

## साम्ब उवाच

आदित्यमण्डले दीक्षा कस्य कार्या कथं च सा । कदा केन किमर्थं च कथयेदं ममाखिलम् ॥२१

## वासुदेव उवाच

ब्राह्मणं क्षत्रियं वैश्यं कुलीनं शूद्रमेव च । पुरुषं वा स्त्रियं वापि दीक्षयेत्सूर्यमण्डले ॥२२
स्वयं भक्त्योपपन्नश्च प्रणिपत्य गुरुं तथा । गुरुस्तं दीक्षयेद्विप्रः कल्पज्ञः सत्यवाक्छुचिः ॥२३
षष्ठ्यामग्निं समाधाय पूर्वोक्तविधिना क्रमात् । सम्पूज्यार्कं तथा वह्नौ हुत्वा वै हविषा रविम् ॥२४
शिष्यं स्नातमथाचान्तं खषोल्काकृतिविग्रहम् । स्वाङ्गैरालभ्य चाङ्गेषु दर्भवद्भिस्तथाक्षतैः ॥२५
पुष्पैः सम्पूज्य चाङ्गानि देयः कार्यो बलिस्तथा । आदित्यो वरुणोऽर्कोऽग्निः साधितो हृदयेन च ॥२६
भवेद् घृतगुडक्षीरैस्तन्दुलैश्च[1] प्रमाणतः । त्रिभिरञ्जलिभिर्हुत्वा देवायाग्नौ हुतं पुनः ॥२७

---

हवन के समय चतुर्थ्यन्त नाम के अन्त में स्वाहा तथा अन्य कर्मों में स्वाहा छोड़कर वैसा ही प्रयोग करें। शीघ्र कर्मों की समाप्ति के लिए सब के नाम को एक साथ उच्चारण कर अन्त में चतुर्थ्यन्त उच्चारण करें। 'ओं खषोल्काय विद्महे दिवाकराय धीमहि तन्नः सूर्यः प्रचोदयात्' यही मंत्र है।१६-१७। महाबाहो!

दत्त्वा शिष्टाय मुक्त्वैवं दत्त्वान्ते दन्तधावनम्। क्षीरं वृक्षोद्भवं तस्मै द्वादशाङ्गुलसन्निभम् ॥२८
दन्तश्लिष्टेऽपनीते च तेन प्राच्यां क्षिपेत्ततः। दन्तधावनमास्यं च तदा तस्योपरि क्षिपेत् ॥२९
मैत्रावारुणमीशानं वक्रं सौम्यसमाश्रितम्। प्रशस्तं दन्तकाष्ठस्य मुखमन्यत्र निन्दितम् ॥३०
यां दिशं दन्तकाष्ठस्य मुखं पश्यति तत्पतिम्। अर्चयेत्तेन शांतिः स्यादित्युक्तं भानुना स्वयम् ॥३१
पुनस्तद्वचनं श्रुत्वा अङ्गैरालभ्य च क्रमात्। सम्पूज्य लोचने तत्र सञ्चित्य परिजप्य च ॥३२
कारयित्वा च सङ्कल्पं तथा चेन्द्रियसंयमम्। स्वापयेत स्वयं चापि वरं श्रुत्वा समाहितः ॥३३
आचम्य कृतरक्षस्तु कृतद्रव्याधिवासनः। हृदयेन नमेत्प्रातः स्नात्वा हुत्वा हुशानम् ॥३४
स्वप्नं पृच्छेद्यथा दृष्टं शुभं संवादयेच्च तम्। हृदयेनाशुभे दृष्टे शतहोमं समाचरेत् ॥३५
स्वप्ने पश्यति हर्म्याणि देवतानां हुताशनम्। नदीयानानि रम्याणि उद्यानोपवनानि च ॥३६
पत्रपुष्पफलाढ्यानि कमलानि च राजतम्। सम्पश्यति यदि स्वप्ने ब्राह्मणं वेदपारगम् ॥३७
राजानं शौर्यसम्पन्नं धनाढ्यं क्षत्रियोत्तमम्। शुश्रूषणपरं शूद्रं यदि तत्त्वार्थमादिशेत् ॥३८
प्रशस्तं भाषणं चैव यथासम्भवतो मतम्। एतैः स्पर्शनमेतेषां श्रेष्ठमारोहणं ततः ॥३९
वाहनानि प्रशस्तानि प्रासादं नावमेव च। पर्वतं च समारुह्य विपुलां भार्गवीं भजेत् ॥४०
पीत्वा सुरां समुद्रं च दध्याज्यं क्षीरमेव च। सोमं मांसं हविर्भुक्त्वा काश्यपीं लभते नरः ॥४१
लब्ध्वा वस्त्राणि रत्नानि विविधाभरणानि च। वाहनानि महीं गाश्च धान्योपकरणानि च ॥४२

---

उद्देश्य से तीन अंजलि पुनः अग्नि में डाले।२५-२७। शिष्ट को इस विधान के उपरांत दंतधावन (दातून) करने के लिए मुक्त करे। उसे (दातून को ) किसी क्षीर वाले वृक्ष की बारह अंगुल की होनी चाहिए। दाँतों को साफ कर उसे पूर्व की ओर त्याग दे दातून एवं सभी मुख से निकले अशुद्ध पदार्थों का

समृद्धिमाप्नुयात्किञ्चित्स्वप्नानां दर्शनं शुभम् । शुभकर्मानुगं यच्च तत्सर्वं शुभमुच्यते ।।४३
तस्मादन्यदनिष्टं स्यात्तस्माद्युक्ता प्रतिक्रिया । क्रमादालिख्य सप्तम्यां तत्र सम्पूज्य भास्करम् ।४४
तर्पयित्वा द्विजाञ्छिष्टानानम्य पूर्ववद्गुरुम् । सृष्टिक्रमेण भृत्यर्थं मुक्त्यर्थं नान्यथा भवेत् ।।४५
दिवाकरं समालभ्य पुरुषोऽथ यथाक्रमम् । सर्वग्रहेषु तत्त्वेषु यथावत्तन्नियोजयेत् ।।४६
विशुद्धेषु विशुद्धं तं ध्यात्वा चादित्यवत्क्रमात् । नियोजयेत्पृथिव्याश्च ततः प्रभृति सर्वशः ।।४७
आदित्यमण्डलं शुद्धं सर्वमुक्तं नियोजयेत् । एवं तु मनसा ध्यात्वा जुहुयाच्चैव तं शतम् ।।४८
सर्वैर्मन्त्रैः क्रमादेवं दीक्षा प्रोक्ता वरापरा । कृत्वैव पुष्पपातं तु तस्मिन्नादित्यमण्डले ।।४९
बद्धास्यमञ्जलौ पुष्पं कृत्वा दत्त्वा च मन्त्रितम् । क्षिपेद्वै कुलशुद्ध्यर्थं नामार्थं च विशेषतः ।।५०
यत्र तत्पतितं पुण्यं तस्य तत्कुलमादिशेत् । नाम चादित्यसंयुक्तमित्युक्तं भानुना स्वयम् ।।५१
सम्पूज्य श्रावयेत्तत्र समयानर्कभाषितान् । प्रातः सायं मध्याह्ने रवेरभिमुखः स्थितः ।।५२
उपस्थानं सदा कुर्यादर्चनं च सदा नरः । अदृष्ट्वार्कं न भोक्तव्यं दिवा रात्रौ हुताशनम् ।।५३
दृष्ट्वा भोक्तव्यमर्काख्यं न भोक्तव्यं कदाचन । न च पद्यां स्पृशेत्तद्वन्नासनं परिवर्जयेत् ।।५४
न लङ्घ्या प्रतिमाच्छाया न लङ्घ्यास्तिथयः क्वचित् । नक्षत्राणि ग्रहा योगा मासा मासाधिपाश्च ये ।।५५
अयने ऋतवः पक्षास्तथैव दिवसानि च । कालः संवत्सरश्चापि यः कश्चित्काल उच्यते ।।५६

---

कर्म जिसमें हों वे सभी शुभ स्वप्न कहे जाते हैं ।४२-४३। उससे अन्य स्वप्न अनिष्ट फलदायक होते हैं, उसकी प्रतिक्रिया करनी आवश्यक होती है, इस प्रकार क्रमशः सप्तमी में लिखकर सूर्य की पूजा करके शिष्ट ब्राह्मणों की तृप्ति पूर्वक पहले की भाँति गुरु को प्रणाम करें । सृष्टि के क्रम से वह दूसरी भाँति भृत्य कार्य करने अथवा मुक्ति के योग्य नहीं हो सकता है ।४४-४५। पुरुष दिवाकर की प्राप्ति करके उन्हें

अभिवन्द्यः स सर्वोऽपि नमस्यः पूज्य एव च । तस्मात्कालाधिपः सूर्यः स्वयं कालश्च पठ्यते ॥५७
ज्योतिर्गणस्य सर्वस्य स्थावरास्थावरस्य च । चेतनाचेतनस्यापि सर्वात्मा यः प्रकीर्तितः ॥५८
स्तुत्यो वन्द्यः सदा पूज्यस्त्वयायं सर्वथा नृप । मनसा कर्मणा वाचा देवनिन्दां परित्यजेत् ॥५९
प्रेषयित्वा[1] च निर्माल्यं तदश्वेभ्यो निवेदयेत् । प्रक्षाल्य हस्तौ पादौ च नमस्कुर्याद्दिवाकरम् ॥६०
इत्येषा परमा दीक्षा तव संक्षेपतो मया । भुक्तिमुक्तिकरी चापि कथिता प्रविभागतः ॥६१

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने सूर्यदीक्षावर्णनं नामैकोनपञ्चाशदधिकशततमोऽध्यायः ।१४९।

# अथ पञ्चाशदधिकशततमोऽध्यायः

## आदित्यपूजाविधिवर्णनम्

### वासुदेव उवाच

अतः परं प्रवक्ष्यामि यथा पूज्यो दिवाकरः । स्थण्डिले यदुशार्दूल निबोधैकाग्रमानसः ॥१
मण्डलैरष्टभिःकार्यं चक्रं कालात्मकं शुभम् । मध्ये पद्माकृतं चक्रमरैर्द्वादशभिर्युतम् ॥२
तन्मध्ये कमलं प्रोक्तं पत्राष्टकसमन्वितम् । सर्वात्मा सकलो देवः खषोल्कः किरणोज्ज्वलः ॥३

---

काल (समय) रूप कहे जाते हैं ।५५-५७। ज्योतिर्गण, सभी स्थावर तथा उससे भिन्न सृष्टि वाले, चेतन, एवं अचेतन सभी के आत्मा सूर्य बताये गये हैं ।५८। सूर्य तुम्हारे लिए सर्वथा स्तुति, वंदन, एवं पूजा, करने के योग्य हैं । मन, वाणी, एवं कर्म द्वारा दूसरे की निन्दा करना छोड़ देना चाहिए ? उनके निर्माल्य को उनके अश्वों के लिए निवेदित करे । पश्चात् हाथ, पैर का प्रक्षालन पूर्वक सूर्य को नमस्कार करे । मैंने

पूजनीयः सदा मध्ये सहस्रकिरणायुधः । प्रणवेन महाबाहो चतुर्बाहुसमन्वितः ।।४
अरुणं[1] पूजयेत्प्राज्ञः सदा देवाग्रजं[2] शुभम् । दक्षिणे पूजयेद्देवीं निक्षुभां भास्करस्य तु ।।५
रेवतं दक्षिणे पार्श्वे उत्तरे पिङ्गलं सदा । संज्ञां च यदुशार्दूल श्रेयसे सततं बुधः ।।६
आग्नेय्यां लेखकं वीर नैर्ऋत्यामश्विनौ तथा । वायव्यां पूजयेद्देवं मनुं वैवस्वतं विभुम् ।।७
ऐशान्यां पूजयेद्देवीं यमुनां लोकपावनीम् । द्वितीयावरणे वीर पूर्वतः पूजयेद्वियत् ।।८
दक्षिणे च ततो देवीं पश्चिमे गरुडं तथा । उत्तरे नागराजानं पुत्रमैरावतं शुभम् ।।९
आग्नेय्यां पूजयेद्धेलिं प्रहेलिं नैर्ऋते तथा । वायव्यामुर्वशीं देवीमीशाने विनतां तथा ।।१०
तृतीयावरणे पूर्वे पूजयेद्गुरुमादरात् । पश्चिमे त्वर्कपुत्रं तु उत्तरे धिषणं तथा ।।११
ऐशाने शशिपुत्रं तु सोममाग्नेयमण्डले । पूजयेद्दक्षिणे कोणे नैर्ऋते राहुमादरात् ।।१२
वायव्ये विकचं वीर पूजयेत्सततं बुधः । चतुर्थावरणे देवं पूजयेल्लेखमादरात् ।।१३
आग्नेये शाण्डिलीपुत्रं दक्षिणे दक्षिणाधिपम् । विरूपाक्षं नैर्ऋते देवं जलेशं पश्चिमे तथा ।।१४
वायुपुत्रं च वायव्यां सततं पूजयेन्नरः । ईशाने देवमीशानं पूजयेत्सततं बुधः ।।१५
उत्तरे यक्षराजानां कुबेरं पूजयेद्बुधः । पञ्चमे पूजयेद्वीर सदा स्वावरणे द्विजाः ।।१६
पूर्वतः परमां देवीं महाश्वेतां महामतिः । श्रियमृद्धिं विभूतिं च धृतिं चैवोन्नतिं तथा ।।१७

---

सहस्र किरण रूपी अस्त्र वाले उस सूर्य की, जिसके चार हाथ हों, प्रणव (ओंकार) पूर्वक पूजा सुसम्पन्न करनी चाहिए । विद्वानों को चाहिए कि जो शुभ मूर्ति एवं सदा देवों के अग्रज हैं, उस अरुण (वरुण) की भी पूजा सुसम्पन्न करें सूर्य के दक्षिण की ओर स्थित निक्षुभा देवी की पूजा करनी चाहिए ।३-५। ... उत्तर पार्श्व में स्थित पिंगल की तथा बुद्धिमानो को

पृथिवीं यदुशार्दूल महाकीर्तिं तथैव च । इन्द्रं विष्णुं चार्यमणं भगं पर्जन्यमेव च ॥१८
विवस्वन्तं तथार्कं च त्वष्टारं किरणोज्ज्वलम् । पूजयेद्वरुणं षष्ठे चैवमेतान्दिवाकरान् ॥१९
शिरो नेत्रे तथा वर्म अस्त्रं च यदुसत्तम । अरुणं सरथं वीर सप्तमे पूजयेद्बुधः ॥२०
तथाश्वान्यदुशार्दूल सदा चावरणे बुधः । यक्षरक्षांसि गन्धर्वान्मासान्पक्षानहानि तु ॥२१
संवत्सरं तथा पुत्र ह्येतान्संपूजयेत्पुरा । य एवं पूजयेद्देवं भास्करं सततं नरः ॥
स गच्छेत्परमं स्थानं यत्र गत्वा न शोचति ॥२२

(ॐ खषोल्काय नमः)

मूलमन्त्राक्षराणीह चाङ्गानि परिचक्षते । अनेन विधिना यस्तु पूजयेत्सततं रविम् ॥२३
नित्यमुभयसप्तम्यां स गच्छेत्परमं पदम् । इत्युक्त्वा भगवान्देवो जगामाशु गृहं रविः ॥२४

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे साम्बोपाख्याने आदित्यपूजाविधिवर्णनं नाम पञ्चाशदधिकशततमोऽध्यायः ।१५०।

# अथैकपञ्चाशदधिकशततमोऽध्यायः

## सौरधर्मवर्णनम्

### सूत उवाच

अथ राजा महातेजाः शतानिको द्विजोत्तमम् । प्रणम्य शिरसा भक्त्या सुमन्तुं वाक्यमब्रवीत् ॥१

---

महाकीर्ति, इन्द्र, विष्ण अर्यमा, भग, पर्जन्य, विवस्वान, उज्ज्वल किरण वाले सूर्य, और वरुण की पूजा

अहो देवस्य माहात्म्यं भास्करस्यामितौजसः । कीर्तितं भवता मह्यं सर्वपापप्रणाशनम् ॥२
तस्मान्नार्कसमं देवं लोके पश्यामि सुव्रत । न चाप्यस्य स्थिता विप्र गतिर्लोकेषु विद्यते ॥३
प्रवर्तते जगद्विप्र सर्गकाले दिवाकरात् । स्थितौ पालयते चापि कल्पन्ति संहरेत्पुनः ॥४
श्रुत्वैवं देवमाहात्म्यं भास्करस्यामितौजसः । कीर्तितं भवता मह्यमश्वमेधशताद्वरम् ॥५
किं तु मे संशयो ब्रह्मन्सुमहान्हृदि वर्तते । केनोपायेन विप्रेन्द्र मुच्यते सम्भवार्णवात् ॥६
दिवाकरप्रसादाद्वै सुप्रसन्नाद्वृषध्वजात् । कथं तुष्येत्सदा देवो धर्मेण कतरेण तु ॥७
श्रुता मे बहवो धर्माः श्रुतिस्मृत्युदितास्तथा । वैष्णवाः शैवधर्माश्च तथा पौराणिकाः श्रुताः ॥८
श्रोतुकामो ह्यहं विप्र सौरं धर्ममनौपमम् । भगवन्सर्वधन्यास्ते सौरधर्मपरायणाः ॥९
ब्रूहि मे देवदेवस्य भानोर्धर्ममनौपमम् । शृण्वतो नास्ति मे तृप्तिरमृतस्यैवमेव च ॥१०
अश्वमेधादयो यज्ञा बहुसम्भारविस्तराः । न शक्यास्ते यतः कर्तुमल्पवित्तैर्द्विजातिभिः ॥११
सुखोपायमतो ब्रूहि धर्मकामार्थसाधकम् । हिताय सर्वमर्त्यानां सर्वपापभयापहम् ॥१२
सौरधर्मपरं पुण्यं पवित्रं पापनाशनम् । श्रुत्वा तु वचनं राज्ञो व्यासशिष्यो महामुनिः ॥
प्रणम्य शिरसा व्यासमिदं वचनमब्रवीत् ॥१३

---

शिर से नमस्कार करके उनसे कहा—अमित तेज वाले महात्मा सूर्य देव का माहात्म्य जो समस्त पापों का नाशक है, आपने मुझे बता दिया यह अत्यन्त हर्ष की बात है ।१-२। हे सुव्रत ! इसलिए सूर्य के समान कोई देव मुझे दिखाई नहीं दे रहा है, और विप्र ! लोकों में इनकी गति कहीं स्थित दिखायी नहीं दे रही

## सुमन्तुरुवाच

श्रूयतामभिधास्यामि सुखोपायं महाफलम् । परमं सर्वधर्माणां सर्वधर्ममनौपमम् ।।१४
रविणा कथितं पूर्वमरुणस्य विशांपते । कृष्णस्य ब्रह्मणो वीर शङ्करस्य न विद्यते ।।१५
संसारार्णवमग्नानां सर्वेषां प्राणिनामयम् । सौरधर्मतमः श्रीमान्हिताय जगतोदितः ।।१६
यैरयं शान्तहृदयैः सूर्यभक्तैर्भगार्थिभिः । संसेव्यते परो धर्मस्ते सौरा नात्र संशयः ।।१७
एककालं द्विकालं वा त्रिकालं नित्यमेव च । ये स्मरन्ति रविं भक्त्या सकृदेवापि भारत ।।
सर्वपापैर्विमुच्यन्ते सप्तजन्मकृतैरपि ।।१८
स्तुवन्ति ये सदा भानुं न ते प्रकृतिमानुषाः । स्वर्गलोकात्परिभ्रष्टास्ते ज्ञेया भास्करा भुवि ।।१९
नानर्कः स्मरतेऽर्कं वै नानर्कोऽर्कं समर्चयेत् । नानर्कः कीर्तयेदर्कं नानर्कोऽर्कमवाप्नुयात् ।।२०
सौरधर्मस्य सारोऽयं सूर्यभक्तिः सुनिश्चला । षोडशाङ्गा च सा प्रोक्ता रविणेह दिवौकसाम् ।।२१
प्रातः स्नानं जपो होमस्तथा देवार्चनं नृप । द्विजानां पूजनं भक्त्या पूजा गोश्वत्थयोस्तथा ।।२२
इतिहासपुराणेभ्यो भक्तिश्रद्धापुरस्कृतम् । श्रवणं राजशार्दूल वेदाभ्यासस्तथैव च ।।२३
मद्भक्त्या जनवात्सल्यं पूजायां चानुमोदनम् । स्वयमभ्यर्चयेद्भक्त्या ममाग्रे वाचकं परम् ।।२४
पुस्तकस्य सदा श्रेष्ठ ममातीव प्रियं सुराः । मत्कथाश्रवणं नित्यं स्वरनेत्राङ्गविक्रिया ।।२५

---

**सुमन्तु बोले**—आप सुनें ! मैं सुखसाध्य, महाफलदायक, समस्त धर्मों में उत्तम, तथा सब से अनुपम, एवं विशांपते ! सूर्य ने अरुण के लिए जिसे पहले (समय में) कहा था, बता रहा हूँ । वीर ! जिस कर्म के समान कृष्ण, ब्रह्मा, एवं शिव का धर्म नहीं है । क्योंकि इस संसार सागर में निमग्न सभी प्राणियों

ममानुस्मरणं नित्यं भक्त्या श्रद्धापुरस्कृतम् । षोडशाङ्गा भक्तिरियं यस्मिन्म्लेच्छेऽपि वर्तते ॥
विप्रेन्द्रः स मुनिः श्रीमान्सजात्यः स च पण्डितः ॥२६
न मे पृथक्चतुर्वेदा मद्भक्तः श्वपचोऽपि यः । तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥२७
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥२८
यो मां सर्वगतं पश्येत्सर्वं च मयि संस्थितम् । तस्याहमास्थितो नित्यं स च नित्यं मयि स्थितः ॥२९
अष्टादशार्धकक्षायाः परं चाष्टभिरुद्भवैः । रोधयित्वा महाबाहो तथा ज्ञानतरेण तु ॥३०
दुर्गपालं विजित्याशु भास्करार्धं तु दुर्जयम् । जित्वा च पुरराजानां महातेजमनौपमम् ॥३१
मनसाचलया भक्त्या यो मां ध्यायति मानवः । अहं तमेव चिंतामि आत्मवत्सततं नरम् ॥३२

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मवर्णनं नामैकपञ्चाशदधिकशततमोऽध्यायः ।१५१।

# अथ द्विपञ्चाशदधिकशततमोऽध्यायः

## सूरधर्मेषु प्रश्नवर्णनम्

### सुमन्तुरुवाच

सूरे च दुर्लभा भक्तिर्दुर्लभं सूरपूजनम् । सूराय दुर्लभं दानं सूरहोमश्च दुर्लभः ॥१

---

चाहिए ।२५। इस प्रकार भक्ति एवं श्रद्धा पूर्वक मेरा स्मरण प्रतिदिन करना बताया गया है । यही सोलह अंगों वाली भक्ति है । यदि किसी म्लेच्छ जाति का प्राणी इसे अपनाये तो विप्रेन्द्र मुनि, श्रीमान्, जातिश्रेष्ठ एवं पंडित भी वह हो सकता है । मुझसे पृथक् चारों वेद नहीं है, अतः मेरा भक्त कोई श्वपच

सुदुर्लभं रवेर्ज्ञानं तदभ्यासोऽपि दुर्लभ । सुदुर्लभतरं ज्ञेयं खषोल्कज्ञानमुत्तमम् ॥२
सुदुर्लभतरं ज्ञानं सदा वै भास्करस्य तु । प्रदक्षिणां चक्रतुर्वै पादौ भक्त्याऽर्कमन्दिरे ॥३
तौ करौ श्लाघ्यतां प्राप्तौ यौ पूजां चक्रतू रवेः । सैवैका रसना धन्या स्तोत्रं या कुरुते रवेः ॥४
तन्मनः पुण्यतां प्राप्तं यद्धित्वा विषयं नृप । निश्चला च रवेर्लीला निर्भीका क्रोधवर्जिता ॥५

## शतानीक उवाच

सूर्यार्चनविधिं कुर्वञ्छ्रोतुमिच्छामि तत्त्वतः । त्वत्प्रसादाद्द्विजश्रेष्ठ कौतूहलमतीव मे ॥६
यत्पुण्यं स्थापिते सूर्ये कृते सूर्यालये च यत् । सम्मार्जने च यत्पुण्यं यत्पुण्यमुपलेपने॥७
स्थाने कृते च यत्पुण्यं तथा नीराजने कृते । नीलौषधिप्रवापेन नृत्यमङ्गलवादितैः ॥८
अर्घ्यदानेन यत्पुण्यं तोयस्नानेन यद्भवेत् । पञ्चामृतमयस्नाने दधिस्नाने च यत्फलम् ॥९
चक्राभ्यङ्गे च यत्प्रोक्तं वज्रस्नाने च यत्फलम् । मधुस्नाने पयःस्नाने स्नान इक्षुरसस्य तु ॥१०
उद्वर्तनं शुचिस्थाने कुशपुष्पोदकेन तु । सुवर्णरत्नतोयैश्च गन्धचन्दनवारिभिः ॥११
कर्पूरागुरुतोयेन स्वच्छतो येन यत्फलम् । विलेपनैश्च गन्धाढ्यैर्विलेपनफलं लभेत् ॥१२
तालपत्रप्रदाने तु प्रदाने चामरस्य तु । रक्तपुष्पार्चने यच्च दामभिः पूजनेन च ॥१३
सुमानां मण्डपे यच्च पुष्पमालावलम्बनात् । पूजाभक्तिविशेषैश्च गृहमालावलम्बने ॥१४

---

हवन करना भी दुर्लभ है ।१। सूर्य का ज्ञान अत्यन्त दुर्लभ है और उसका अभ्यास करना भी । जिस प्रकार खषोल्क ज्ञान अत्यन्त दुर्लभ है, उसी भाँति सदैव सूर्य का भी ज्ञान । भक्तिपूर्वक सूर्य के मंदिर में

पुष्पदानविशेषेण धूपदीपैश्च यत्फलम् । वस्त्रालङ्कारदाने तु पुण्यश्रवणकीर्तने ।।१५
ब्रह्मश्रवस्य दाने तु अव्यङ्गस्य च गोपते । मगानां मत्प्रसादेन अभिवादनपूजने ।।१६
व्योमपूजाफलं यच्च अरुणस्य च पूजनम् । तथान्यदपि यत्प्रोक्तमज्ञानाद्ब्राह्मणोत्तम ।।१७
तत्सर्वं ब्रूहि मे ब्रह्मन्भक्तानामनुकम्पया ।।१८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सूरधर्मेषु प्रश्नवर्णनं नाम द्विपञ्चाशदधिकशततमोऽध्यायः ।१५२।

# अथ त्रिपञ्चाशदधिकशततमोऽध्यायः

## सूर्यतेजोवर्णनम्

### सुमन्तुरुवाच

सुमतिश्च रवेर्भक्तः पाण्डवेय महामते । अतस्ते निखिलं वच्मि शृणुष्वैकमना नृप ।।१
कल्पादौ सृजतो वीर ब्रह्मणो विविधाः प्रजाः । अहंकारो महानासीन्नास्ति लोके मदुत्तमः ।।२
तथा पालयतो वीर केशवस्य धरापते । तथा संहरतो जज्ञेऽहङ्कारस्त्र्यम्बकस्य च ।।३
चिंतयन्तोथ ते देवाः केशवश्च नराधिप । मिथस्ते स्पर्धया युक्ताः परस्परविरोधिनः ।।४
विवादस्तु महानासीत्कञ्जाम्बुनगौकसाम् । परस्परं महाबाहो मनसाश्रित्य केवलम् ।।५

---

पुष्प दान की विशेषता करने, धूप-दीप करने, वस्त्र एवं अलंकार प्रदान करने, पुण्य ब्रह्म घोष के सुनने, कीर्तन करने । सूर्य के लिए अव्यंग प्रदान करने, मेरी प्रसन्नता के लिए मगों का अभिवादन एवं पूजा करने ... और ब्राह्मणोत्तम ! अज्ञानवश मै जिसे नहीं कह पाया उसके समेत इन

अहं कर्ता विकर्ताऽहं पालकोऽहं जगत्प्रभुः । इत्याह भगवान्ब्रह्मा कृष्णभीमौ समर्चितौ ।।६
तथैत्य शंकरः क्रुद्धः कः शक्तो मदृते भुवि । संहर्तुं जगदेतद्धि स्रष्टुं पालयितुं तथा ।।७
नारायणोऽप्येवमेव मनाक् क्रोधसमन्वितः । न वा शक्तो जगत्स्रष्टुं संहर्तुं रक्षितुं तथा ।।८
एवं तेषां प्रवदतां क्रुद्धानां च परस्परम् । समाविशत्तदाऽज्ञानं तमो मोहात्मकं विभो ।।९
तेन क्रान्तधियः सर्वे न पश्यन्ति परस्परम् । अत्यर्थं मोहमापन्ना न जानन्तीह किञ्चन ।।१०
अपश्यन्तो मिथस्ते तु निषण्णाः क्ष्मातले विभो । आरमन्ति हि ये चान्ये ते दिवाकरमास्थिताः ।।११
तमसा मोहिताः सर्वे निद्रावत्क्रान्तचेतसः । मनाग्ज्ञानेन चाक्रान्ताः किं कुर्यामेति मोहिताः ।।१२
अथ भूताधिपो देवो गोश्रुताभरणोज्ज्वलः । चन्द्रार्धकृतशोभस्तु शीतलांशुविशोधितः ।।१३
आर्तिमेत्य परां वीर मोहितस्तमसा विभो । अपश्यन्नब्रवीद्देवं माधवं भूधरं हरिम् ।।१४

## महादेव उवाच

कृष्ण कृष्ण महाबाहो क्व गतस्त्वं महामते । ब्रह्मा च क्व गतो वीर नाहं पश्यामि वां क्वचित् ।।१५
मोहेन महताहं वै तमसा च विमोहितः । किं करोमि क्व गच्छामि क्वचाहमधुना स्थितः ।।१६
क्ष्माधरं पृथिवीं वृक्षान्देवगन्धर्वदानवान् । विपुलं सागरं सिन्धूंर्नाहं पश्यामि किञ्चन ।।१७

---

उस कलह के समय में ही इस जगत् का कर्ता, विकर्ता, (नाशक), एवं पालक हूँ, भगवान् ब्रह्मा कहने लगे ।, वहाँ पहुँच कर शंकर भी कुद्ध होकर कहने लगे कि इस भूतल में जगत् के सर्जन, पालन एवं नाश करने के लिए मेरे अतिरिक्त कौन समर्थ हो सकता है, इसी प्रकार नारायण भी क्रोध कर कहने लगे कि जगत् की सृष्टि, पालन एवं नाश करने के लिए मेरे अतिरिक्त कोई अन्य समर्थ नहीं है विभो ! इस प्रकार

केनोपायेन पश्येयं जगत्स्थावरजङ्गमम् । ब्रूहि मे देवशार्दूल व्रीडा मेऽतीव जायते ॥१८
शङ्करस्य वचः श्रुत्वा हरिर्वचनमब्रवीत् । शोकगद्गदया वाचा तमसा मोहितो नृप ॥१९

विष्णुरुवाच

भीम भीम न जानेऽहं क्व भवान्वर्ततेऽधुना । ममापि मोहितं चेतस्तमसातीव शङ्कर ॥२०
क्व गच्छामि क्व तिष्ठामि कथं तत्स्वस्थतां व्रजेत् । तमसा पूरितं सर्वं जगद्धि परमेश्वर ॥२१
यद्यसौ दृश्यते देवः सुरज्येष्ठोऽम्बुजोद्भवः । पृच्छावस्तं महात्मानं यदि ते रोचते हर ॥२२
हित्वा दर्पमहङ्कारं सममास्थाय केवलम् । पद्मासनं पद्मयोनिं पद्मपत्रनिभेक्षणम् ॥२३
इत्येवं गदतो वाक्यं विष्णोरमिततेजसः । श्रुत्वोवाच विभुर्ब्रह्मा गङ्गाधरमहीधरौ ॥२४
कृष्ण कृष्ण महाबाहो भीम भीम महामते । क्व भवन्तौ ब्रूत किं च किं युवामूचथुर्मिथः ॥२५
ममातीव मनोबुद्धी तमसा वशमागते । न शृणोमि न पश्यामि निद्रामोहवशं गतः ॥२६
अहो बत जगत्सर्वं सदेवासुरमानुषम् । तमसा व्याप्टतं देवौ न जाने क्व गतं महः ॥२७
अथ तेषां प्रवदतां ब्रह्मादीनां दिवौकसाम् । दर्पक्रोधभयार्तानां तमसाक्रान्तचेतसाम् ॥२८
तेषां दर्पापहाराय प्रबोधार्थं च गोपतेः । तेजोरूपं समुद्भूतमष्टशृङ्गमनौपमम् ॥२९
अलक्ष्यं पापतमसा महद्व्योम नराधिप । ज्वालामालावृतं वीर बहुरूपं च भासते ॥३०

---

उपाय से देख सकूँगा, बताइये ! मुझे अत्यन्त लज्जा हो रही है ।१८। नृप ! इस प्रकार शंकर की बातें सुनकर अज्ञान से मोहित होकर विष्णु शोक प्रकट करते हुए गद्गद् वाणी से बोले ।१९

**विष्णु बोले**—भीम, भीम ! मुझे नहीं मालूम हो रहा है कि इस समय आप कहाँ हैं ! शंकर ! मेरा

शतयोजनविस्तीर्णं गतमूर्ध्वं भ्रमत्तथा । गोमध्यतो महाराज कर्णिकेवाम्बुजस्य तु ॥३१
प्रकाशं तेजसा तस्य जगत्सर्वमिदं नृप । पुरेष्वन्तर्यथा वीर अम्बुजस्यार्चिभिः सदा ॥३२
दृष्ट्वा परस्परं सर्वे हुङ्कारादिविकारिणः । तेजसा मोहितास्तस्य जगत्सर्वमिदं नृप ॥३३
तेजसा मोहितं तस्य महद्व्योम नराधिप । ततो विस्मयमासीनः दृष्टगोपतयो नृप ॥३४
पश्यमाना महो व्योम्नि मिथो वचनमब्रुवन् । अहो तेजः समुद्भूतमस्माकं श्रेयसे नृप ॥३५
प्रकाशाय च लोकानां सर्वे पश्याम किं न्विदम् । ज्ञानायोर्ध्वं गतो ब्रह्मा चाधस्तात्त्रिपुरान्तकः ॥३६
तिर्यग्जगाम देवेशश्चक्राम्बुजगदाधरः । अलब्ध्वा तस्य ते सर्वे प्रमाणं गैरिकाधिपाः ॥३७
विस्मयोत्फुल्लनयनाः समागम्य परस्परम् । सर्वे कञ्जादिका देवा इदं वचनमब्रुवन् ॥३८
कोऽयं किमात्मकश्चायं किमिदं तेजसां निधिः । अहोऽस्य दर्शनात्सर्वे सञ्जातः ज्ञानिनो वयम् ॥३९
तस्मात्सर्वे प्रणम्यैनं स्तुवीमोऽद्भूतदर्शनम् । कृताञ्जलिपुटाः सर्वे चास्तुवंस्त्रिदिवौकसः ॥४०
स्तुवतामप्यथैतेषां सहस्रकिरणो रविः । आत्मानं दर्शयामास कृपया परया वृतः ॥४१
ज्ञात्वा भक्तिं महाबाहो ब्रह्मादीनां महोपमाम् । अथ ते व्योम्नि देवेशं ददृशुः परमेश्वरम् ॥४२
खषोल्कलोकनाथेशं सहस्रकिरणोज्ज्वलम् । कृत्तिकाभिरसंस्पृष्टं यद्वा तत्कार्तिकास्थितम् ॥४३

---

हों ।२८-३०। महराज ! वह सौ योजन में विस्तृत होकर पृथ्वी के मध्य ऊपर आकाश में कमल की कर्णिका की भाँति घूम रहा था ।३१। राजन् ! उसके तेज से सम्पूर्ण जगत् वीर ! बिजली द्वारा सदैव प्रकाशित नगर के भीतरी भाग की भाँति सहसा प्रकाशित हो गया । नृप ! उसके तेज से मोहित हुए उन